सचित्र दुर्गा-सप्तशती



खेमराज श्रीकृष्णदास प्रकाशन, बम्बई

अथ सचित्र दुर्गासप्तशती प्रा०

खेमराज श्रीकृष्णदास प्रकाशन बम्बई

संस्करण-सन् १९९९ संवत् २०५६

मूल्य ५० रुपये मात्र

सर्वाधिकार-
प्रकाशक द्वारा सुरक्षित

Printed by Shri Sanjay Bajaj for M / s Khemraj Shrikrishnadass proprietors Shri Venkateshwar press Mumbai - 400 004. at their Shri Venkateshwar press, 66, Hadapsar Industrial Estate, Pune - 411 013.

प्रस्तावना ।

श्रीजगज्जननी भगवती दुर्गाजी इस कलिकालमें शीघ्र फल देनेवाली हैं; अस्तु सभी माताका भजन पाठ करतेहैं । चिरकालसे यह मनोरथ होरहाथा कि, कोई ऐसी प्रति प्राप्त हो जिसमें स्थल २ पर चरित्रानुरूप चित्र हों तो पाठ करनेवालोंका चित्त विशेष भक्तिमें लीन रहै. यह जगन्माताकी कृपाही समझनी चाहिये कि, मेरे परम हितैषी उन्नाव अचलगंज निवासी मिश्रवंशावतंस पं० गुरुदयालमिश्रात्मज पं० शिवसेवकलाल मिश्रजीने इस सचित्र प्रतिके दर्शन कराये, तभीसे यह उल्लास हुआ कि यह प्रति सर्वसाधारणके दृष्टिगोचर हो अत एव अपने परममान्य श्रीमान् सेठजी खेमराज श्रीकृष्णदासजी मालिक श्रीवेङ्कटेश्वर प्रेस बंबईसे निवेदन किया. और उन्होने सादर प्रकाशित कर इस अमूल्य ग्रंथके सबको दर्शन कराये । इस ग्रंथका सर्वाधिकार उक्त सेठजीसाहबको समर्पण किया गयाहै ।

बेथरनिवासी वाजपेयी शिवदुलारे, शिवरत्नशर्म्मा ।

चैत्र सं० १९६४ वि०

अथ प्रयोगविधि प्रारंभः


श्री गणेशाय नमः
श्री सरस्वत्यै नमः

॥ श्रीगणेशाय नमः ॥

ऐं ह्रीं क्लीं चामुण्डायै विच्चे १०८। ॐ बीजत्रयायै विद्महे तत्प्रधानायै धीमहि ॥ तन्नः शक्तिः प्रचोदयात् ॥ ॐ ऐं श्रीं नमः १। ॐ ऐं ह्रीं नमः २। ॐ ऐं क्लीं नमः ३। ॐ ऐं श्रीं नमः ४। ॐ ऐं प्रीं नमः ५। ॐ ऐं ह्रां नमः ६। ॐ ऐं ह्रीं नमः ७। ॐ ऐं सौं नमः ८। ॐ ऐं प्रें नमः ९। ॐ ऐं म्रीं नमः १०। ॐ ऐं ह्लीं नमः ११। ॐ ऐं म्लीं नमः १२। ॐ ऐं स्त्रीं नमः १३। ॐ ऐं क्रां नमः १४। ॐ ऐं ह्स्लीं नमः १५। ॐ ऐं क्रीं नमः १६। ॐ ऐं चां नमः १७। ॐ ऐं भें नमः १८।

प्र० ॐ ऐं क्रीं नमः १९। ॐ ऐं वैं नमः २०। ॐ ऐं ह्रौं नमः
२ २१। ॐ ऐं युं नमः २२। ॐ ऐं जुं नमः २३। ॐ ऐं हं
नमः २४। ॐ ऐं शं नमः २५। ॐ ऐं रों नमः २६ ॐ
ऐं यं नमः २७। ॐ ऐं विं नमः २८। ॐ ऐं वैं नमः २९
। ॐ ऐं चें नमः ३०। ॐ ऐं ह्रीं नमः ३१। ॐ ऐं क्रं
नमः ३२। ॐ ऐं सं नमः ३३। ॐ ऐं कं नमः ३४। ॐ
ऐं श्रां नमः ३५। ॐ ऐं त्रों नमः ३६। ॐ ऐं स्त्रां नमः
३७। ॐ ऐं ज्यैं नमः ३८। ॐ ऐं रौं नमः ३९। ॐ ऐं
वि० द्रां नमः ४०। ॐ ऐं द्रों नमः ४१। ॐ ऐं ह्रां नमः ४२
। ॐ ऐं द्रूं नमः ४३। ॐ ऐं शां नमः ४४। ॐ ऐं मीं

नमः ४५। ॐ ऐं श्रौं नमः ४६। ॐ ऐं जुं नमः ४७। ॐ ऐं हल्रुं नमः ४८। ॐ ऐं श्रूं नमः ४९। ॐ ऐं प्रीं नमः ५०। ॐ ऐं रं नमः ५१। ॐ ऐं वं नमः ५२। ॐ ऐं व्रीं नमः ५३। ॐ ऐं ट्लूं नमः ५४। ॐ ऐं स्त्रौं नमः ५५। ॐ ऐं ल्वां नमः ५६। ॐ ऐं लूं नमः ५७। ॐ ऐं सां नमः ५८। ॐ ऐं रौं नमः ५९। ॐ ऐं स्हौं नमः ६०। ॐ ऐं क्रूं नमः ६१। ॐ ऐं झौं नमः ६२। ॐ ऐं श्रौं नमः ६३। ॐ ऐं वं नमः ६४। ॐ ऐं त्रूं नमः ६५। ॐ ऐं क्रौं नमः ६६। ॐ ऐं क्लूं नमः ६७। ॐ ऐं क्लीं नमः ६८। ॐ ऐं श्रीं नमः ६९। ॐ ऐं व्लूं नमः ७०। ॐ

प्र० ऐं ठां नमः ७१। ॐ ऐं ठ्रीं नमः ७२। ॐ ऐं स्त्रां नमः ७३
३ । ॐ ऐं स्लूं नमः ७४। ॐ ऐं क्रैं नमः ७५। ॐ ऐं च्रां न
मः ७६। ॐ ऐं फ्रां नमः ७७। ॐ ऐं जीं नमः ७८। ॐ
ऐं लूं नमः ७९। ॐ ऐं स्लूं नमः ८०। ॐ ऐं नों नमः
८१। ॐ ऐं स्त्रीं नमः ८२। ॐ ऐं प्रूं नमः ८३। ॐ ऐं
सूं नमः ८४। ॐ ऐं ज्रां नमः ८५। ॐ ऐं वौं नमः ८६
। ॐ ऐं ओं नमः ८७। ॐ ऐं श्रौं नमः ८८। ॐ ऐं ऋं
वि० नमः ८९। ॐ ऐं रूं नमः ९०। ॐ ऐं क्लीं नमः ९१। ॐ
ऐं दुं नमः ९२। ॐ ऐं ह्रीं नमः ९३। ॐ ऐं गूं नमः ९४
। ॐ ऐं लां नमः ९५। ॐ ऐं ह्रां नमः ९६। ॐ ऐं गं न

मः ९७। ॐ ऐं ऐं नमः ९८। ॐ ऐं श्रौं नमः ९९। ॐ
ऐं जूं नमः १००। ॐ ऐं डें नमः १०१। ॐ ऐं श्रौं नमः
१०२। ॐ ऐं छ्रां नमः १०३। ॐ ऐं क्लीं नमः १०४ ॥
॥ प्रथमोऽध्यायः ॥१॥ ॐ ऐं श्रौं नमः १। ॐ ऐं श्रीं
नमः २। ॐ ऐं ह्सूं नमः ३। ॐ ऐं हौं नमः ४। ॐ ऐं
ह्रीं नमः ५। ॐ ऐं अं नमः ६। ॐ ऐं क्लीं नमः ७। ॐ
ऐं चां नमः ८। ॐ ऐं मुं नमः ९। ॐ ऐं डां नमः १०। ॐ
ॐ ऐं यैं नमः ११। ॐ ऐं विं नमः १२। ॐ ऐं च्चें नमः
१३। ॐ ऐं ईं नमः १४। ॐ ऐं सौं नमः १५। ॐ ऐं व्रां
नमः १६। ॐ ऐं त्रौं नमः १७। ॐ ऐं लूं नमः १८। ॐ

प्र० ऐं वं नमः १९। ॐ ऐं ह्रां नमः २०। ॐ ऐं क्रीं नमः २१।
४ ॐ ऐं सौं नमः २२। ॐ ऐं यं नमः २३। ॐ ऐं ऐं नमः२४
। ॐ ऐं मूं नमः २५। ॐ ऐं सः नमः २६। ॐ ऐं हं नमः
२७। ॐ ऐं सं नमः २८। ॐ ऐं सों नमः २९। ॐ ऐं शं
नमः ३०। ॐ ऐं हं नमः ३१। ॐ ऐं ह्रौं नमः ३२। ॐ
ऐं म्लीं नमः ३३। ॐ ऐं यूँ नमः ३४। ॐ ऐं त्रूं नमः३५
। ॐ ऐं स्त्रीं नमः ३६। ॐ ऐं आं नमः ३७। ॐ ऐं प्रें न
वि० मः ३८। ॐ ऐं शं नमः ३९। ॐ ऐं ह्रां नमः ४०। ॐ ऐं
स्मूं नमः ४१। ॐ ऐं ऊं नमः ४२। ॐ ऐं गूं नमः ४३।
ॐ ऐं व्रूं नमः ४४। ॐ ऐं ह्रूं नमः ४५। ॐ ऐं भैं नमः

४६। ॐ ऐं ह्नां नमः ४७। ॐ ऐं क्रूं नमः ४८। ॐ ऐं मूं नमः ४९। ॐ ऐं ल्रीं नमः ५०। ॐ ऐं श्रां नमः ५१। ॐ ऐं द्रूं नमः ५२। ॐ ऐं ह्रूं नमः ५३। ॐ ऐं ह्सौं नमः ५४। ॐ ऐं क्रां नमः ५५। ॐ ऐं स्हौं नमः ५६। ॐ ऐं म्लूं नमः ५७। ॐ ऐं श्रीं नमः ५८। ॐ ऐं गैं नमः ५९। ॐ ऐं क्रूं नमः ६०। ॐ ऐं त्रीं नमः ६१।ॐ ऐं क्सीं नमः ६३। ॐ ऐं फ्रों नमः ६४। ॐ ऐं ह्रीं नमः ६५।ॐ ऐं शां नमः ६६। ॐ ऐं क्ष्म्रीं नमः ६७। ॐ ऐं रों नमः ६८ ।ॐ ऐं डुं नमः ६९॥ द्वितीयोऽध्यायः ॥२॥ ॐ ऐं श्रौं नमः १। ॐ ऐं क्लीं नमः २। ॐ ऐं सां नमः ३।ॐ

प्र० ऐंत्रों नमः ४। ॐ ऐं प्रूं नमः ५। ॐ ऐं ग्लौं नमः ६। ॐ
५ ऐं क्रौं नमः ७। ॐ ऐं व्रीं नमः ८। ॐ ऐं स्लीं नमः ९।
ॐ ऐं ह्रीं नमः १०। ॐ ऐं हौं नमः ११। ॐ ऐं श्रां नमः १२
। ॐ ऐं ग्रीं नमः १३। ॐ ऐं क्रूं नमः १४। ॐ ऐं क्रीं नमः
१५। ॐ ऐं यां नमः १६। ॐ ऐं द्लूं नमः १७। ॐ ऐं
द्रूं नमः १८। ॐ ऐं क्षं नमः १९। ॐ ऐं ओं नमः २०।
ॐ ऐं क्रौं नमः २१। ॐ ऐं क्ष्म्क्ल्रीं नमः २२। ॐ ऐं वां
नमः २३। ॐ ऐं श्रूं नमः २४। ॐ ऐं ग्लूं नमः २५। ॐ
वि० ऐं ल्रीं नमः २६। ॐ ऐं प्रें नमः २७। ॐ ऐं हूं नमः २८
। ॐ ऐं ह्रौं नमः २९। ॐ ऐं दें नमः ३०। ॐ ऐं नूं

नमः ३१। ॐ ऐं आं नमः ३२। ॐ ऐं फ्रां नमः ३३। ॐ ऐं प्रीं नमः ३४। ॐ ऐं दं नमः ३५। ॐ ऐं फ्रीं नमः ३६। ॐ ऐं ह्रीं नमः ३७। ॐ ऐं गूं नमः ३८। ॐ ऐं श्रौं नमः ३९। ॐ ऐं सां नमः ४०। ॐ ऐं श्रीं नमः ४१। ॐ ऐं जुं नमः ४२। ॐ ऐं हं नमः ४३। ॐ ऐं सं नमः ४४॥ तृतीयोऽध्यायः ॥३॥ ॐ ऐं श्रौं नमः १। ॐ ऐं सौं नमः २। ॐ ऐं दीं नमः ३। ॐ ऐं प्रें नमः ४। ॐ ऐं यां नमः ५। ॐ ऐं रूं नमः ६। ॐ ऐं भं नमः ७। ॐ ऐं सूं नमः ८। ॐ ऐं श्रां नमः ९। ॐ ऐं औं नमः १०। ॐ ऐं लूं नमः ११। ॐ ऐं डूं नमः १२।

प्र० ६ ॐ ऐं जूं नमः १३। ॐ ऐं धूं नमः १४। ॐ ऐं त्रें नमः १५। ॐ ऐं ह्लीं नमः १६। ॐ ऐं श्रीं नमः १७। ॐ ऐं ईं नमः १८। ॐ ऐं ह्रां नमः १९। ॐ ऐं ह्ल्रूं नमः २० । ॐ ऐं क्लूं नमः २१। ॐ ऐं क्रां नमः २२। ॐ ऐं ल्हूं नमः २३। ॐ ऐं फ्रें नमः २४। ॐ ऐं क्रीं नमः २५। ॐ ऐं म्लूं नमः २६। ॐ ऐं घ्रें नमः २७। ॐ ऐं श्रौं नमः २८। ॐ ऐं ह्रौं नमः २९। ॐ ऐं व्रीं नमः ३०। ॐ ऐं ह्रीं नमः ३१। ॐ ऐं त्रौं नमः ३२। ॐ ऐं हल्रौं

वि० नमः ३३। ॐ ऐं गीं नमः ३४। ॐ ऐं यूं नमः ३५ । ॐ ऐं ह्लीं नमः ३६। ॐ ऐं ह्लूं नमः ३७। ॐ ऐं श्रौं नमः

३८। ॐ ऐं ओं नमः ३९। ॐ ऐं अं नमः ४०। ॐ ऐं म्हौं नमः ४१। ॐ ऐं प्रीं नमः ४२॥ इति चतुर्थोऽध्यायः॥४॥ ॐ ऐं श्रौं नमः १। ॐ ऐं प्रीं नमः २। ॐ ऐं ओं नमः ३। ॐ ऐं ह्रीं नमः ४। ॐ ऐं ल्रीं नमः ५। ॐ ऐं त्रों नमः ६। ॐ ऐं क्लीं नमः ७। ॐ ऐं ह्सौः नमः ८। ॐ ऐं ह्रीं नमः ९। ॐ ऐं श्रीं नमः १०। ॐ ऐं हूं नमः ११। ॐ ऐं क्लीं नमः १२। ॐ ऐं रौं नमः १३। ॐ ऐं स्त्रीं नमः १४। ॐ ऐं म्लीं नमः १५। ॐ ऐं प्लूं नमः १६। ॐ ऐं स्हौं नमः १७। ॐ ऐं स्त्रीं नमः १८। ॐ ऐं ग्लूं नमः १९। ॐ ऐं व्रीं नमः २०। ॐ ऐं सौः नमः २१। ॐ ऐं लूं

नमः २२ । ॐ ऐं ल्लूं नमः २३ । ॐ ऐं द्रां नमः २४ । ॐ ऐं

वसां नमः २५ । ॐ ऐं क्ष्म्रीं नमः २६ । ॐ ऐं ग्लों नमः
२७ । ॐ ऐं स्कं नमः २८ । ॐ ऐं त्रूं नमः २९ । ॐ ऐं स्क्लूं
नमः ३० । ॐ ऐं क्रौं नमः ३१ । ॐ ऐं छ्रीं नमः ३२ । ॐ
ऐं म्लूं नमः ३३ । ॐ ऐं क्लूं नमः ३४ । ॐ ऐं शां नमः
३५ । ॐ ऐं ल्हीं नमः ३६ । ॐ ऐं स्लूं नमः ३७ । ॐ ऐं
ल्लीं नमः ३८ । ॐ ऐं लीं नमः ३९ । ॐ ऐं सं नमः ४० ।
ॐ ऐं ल्लूं नमः ४१ । ॐ ऐं ह्सूं नमः ४२ । ॐ ऐं श्रूं नमः
४३ । ॐ ऐं जूं नमः ४४ । ॐ ऐं ह्स्ल्रीं नमः ४५ । ॐ ऐं
स्कीं नमः ४६ । ॐ ऐं क्लां नमः ४७ । ॐ ऐं श्रूं नमः ४८ ।

ॐ ऐं हं नमः ४९। ॐ ऐं ह्लीं नमः ५०। ॐ ऐं क्स्रूं न-
मः ५१। ॐ ऐं द्रौं नमः ५२। ॐ ऐं क्लूं नमंः ५३। ॐ
ऐं गां नमः ५४। ॐ ऐं सं नमः ५५। ॐ ऐं ल्स्रां नमः ५६
। ॐ ऐं फ्रीं नमः ५७। ॐ ऐं स्लां नमः ५८। ॐ ऐं ल्लूं
नमः ५९। ॐ ऐं फ्रें नमः ६०। ॐ ऐं ओं नमः ६१। ॐ
ऐं स्म्लीं नमः ६२। ॐ ऐं ह्रां नमः ६३। ॐ ऐं ऊं नमः
६४। ॐ ऐं ह्लूं नमः ६५। ॐ ऐं हूं नमः ६६। ॐ ऐं
नं नमः ६७। ॐ ऐं स्त्रां नमः ६८। ॐ ऐं वं नमः ६९।
ॐ ऐं मं नमः ७०। ॐ ऐं म्क्लीं नमः ७१। ॐ ऐं ज्ञां न-
मः ७२। ॐ ऐं लं नमः ७३। ॐ ऐं भैं नमः ७४। ॐ

ऐं ल्लूं नमः ७५। ॐ ऐं ह्रौं नमः ७६। ॐ ऐं ईं नमः
७७। ॐ ऐं चें नमः ७८। ॐ ऐं ल्क्रीं नमः ७९। ॐ ऐं
ह्लीं नमः ८०। ॐ ऐं क्ष्म्ल्रीं नमः ८१। ॐ ऐं पूं नमः
८२। ॐ ऐं श्रौं नमः ८३। ॐ ऐं ह्रौं नमः ८४। ॐ ऐं भ्रूं
नमः ८५। ॐ ऐं क्ल्रीं नमः ८६। ॐ ऐं आं नमः ८७।
ॐ ऐं क्रूं नमः ८८। ॐ ऐं त्रूं नमः ८९। ॐ ऐं डुं नमः ९०
। ॐ ऐं जां नमः ९१। ॐ ऐं ह्ल्रूं नमः ९२। ॐ ऐं फ्रौं
नमः ९३। ॐ ऐं क्रौं नमः ९४। ॐ ऐं किं नमः ९५। ॐ
ऐं ग्लूं नमः ९६। ॐ ऐं छ्क्लीं नमः ९७। ॐ ऐं रं नमः ९८
। ॐ ऐं क्सैं नमः ९९। ॐ ऐं स्हुं नमः १००। ॐ ऐं श्रौं न

मः १०१। ॐ ऐं २श्रीं नमः १०२। ॐ ऐं ओं नमः १०३
। ॐ ऐं लूं नमः १०४। ॐ ऐं ल्हूं नमः १०५। ॐ ऐं ल्लूं
नमः १०६। ॐ ऐं स्क्रीं नमः १०७। ॐ ऐं स्त्रौं नमः १०८
। ॐ ऐं स्भ्रूं नमः १०९। ॐ ऐं क्ष्म्क्लीं नमः ११०। ॐ ऐं
व्रीं नमः १११। ॐ ऐं सीं नमः ११२। ॐ ऐं भूं नमः ११३
। ॐ ऐं लं नमः ११४। ॐ ऐं श्रौं नमः ११५। ॐ ऐं स्हैं
नमः ११६। ॐ ऐं ह्वीं नमः ११७। ॐ ऐं श्रीं नमः ११८
। ॐ ऐं फ्रें नमः ११९। ॐ ऐं रूं नमः १२०। ॐ ऐं छ्रूं
नमः १२१। ॐ ऐं ल्हूं नमः १२२। ॐ ऐं कं नमः १२३
। ॐ ऐं द्रें नमः १२४। ॐ ऐं श्रीं नमः १२५। ॐ ऐं सां

फ० नमः १२६। ॐ ऐं ह्रीं नमः १२७। ॐ ऐं ऐं नमः १२८। ॐ
९ ऐं स्क्लीं नमः १२९॥ इति पंचमोऽध्यायः ॥५॥ ॐ ऐं
श्रौं नमः १। ॐ ऐं ओं नमः २। ॐ ऐं त्रूं नमः ३। ॐ ऐं
ह्रौं नमः ४। ॐ ऐं क्रौं नमः ५। ॐ ऐं श्रौं नमः ६। ॐ ऐं
त्रीं नमः ७। ॐ ऐं क्लीं नमः ८। ॐ ऐं प्रीं नमः ९। ॐ ऐं
ह्रीं नमः १०। ॐ ऐं ह्रौं नमः ११। ॐ ऐं श्रौं नमः १२। ॐ
ऐं ऐं नमः १३। ॐ ऐं ओं नमः १४। ॐ ऐं श्रीं नमः १५।
ॐ ऐं क्रां नमः १६। ॐ ऐं हूं नमः १७। ॐ ऐं छ्रां नमः १८
वि० । ॐ ऐं क्ष्म्क्ल्रीं नमः १९। ॐ ऐं लुं नमः २०। ॐ ऐं सौः
नमः २१। ॐ ऐं ह्लौं नमः २२। ॐ ऐं क्रूं नमः २३। ॐ ऐं

सौँ नमः २४ ॥ इति षष्ठोऽध्यायः ॥ ६ ॥ ॐ ऐं श्रों नमः १। ॐ ऐं कुं नमः २। ॐ ऐं ह्रीं नमः ३। ॐ ऐं हं नमः ४। ॐ ऐं सूं नमः ५। ॐ ऐं त्रौं नमः ६। ॐ ऐं ह्रौं नमः ७। ॐ ऐं ओं नमः ८। ॐ ऐं ह्सूं नमः ९। ॐ ऐं क्लूं नमः १०। ॐ ऐं क्रें नमः ११। ॐ ऐं नें नमः १२। ॐ ऐं लूं नमः १३। ॐ ऐं ह्स्लीं नमः १४। ॐ ऐं प्लूं नमः १५। ॐ ऐं शां नमः १६। ॐ ऐं स्लूं नमः १७। ॐ ऐं प्लीं नमः १८। ॐ ऐं प्रें नमः १९। ॐ ऐं अं नमः २०। ॐ ऐं औं नमः २१। ॐ ऐं म्ल्रीं नमः २२। ॐ ऐं श्रां नमः २३। ॐ ऐं सौं नमः २४। ॐ ऐं श्रौं नमः २५। ॐ ऐं प्रीं

प्र० नमः २६। ॐ ऐं ह्स्त्रीं नमः २७॥ इति सप्तमोऽध्यायः
१० ॥७॥ ॐ ऐं श्रौं नमः १। ॐ ऐं म्ह्ल्रीं नमः २। ॐ ऐं
प्रूं नमः ३। ॐ ऐं एं नमः ४। ॐ ऐं क्रों नमः ५। ॐ ऐं
ईं नमः ६। ॐ ऐं एं नमः ७। ॐ ऐं ल्रीं नमः ८। ॐ ऐं
फ्रौं नमः ९। ॐ ऐं म्लूं नमः १०। ॐ ऐं नों नमः ११।ॐ
ऐं हूं नमः १२। ॐ ऐं फ्रौं नमः १३। ॐ ऐं ग्लौं नमः १४
।ॐ ऐं स्मौं नमः १५। ॐ ऐं सौं नमः १६। ॐ ऐं श्रीं न
मः १७। ॐ ऐं स्हौं नमः १८। ॐ ऐं ख्सें नमः १९।ॐ
वि० ऐं क्ष्म्लीं नमः २०। ॐ ऐं ह्लौं नमः २१। ॐ ऐं वीं नमः २२
ॐ ऐं लूं नमः २३। ॐ ऐं ल्सीं नमः २४। ॐ ऐं ब्लीं नमः

२५। ॐ ऐं स्रौं नमः २६। ॐ ऐं ब्रुं नमः २७ । ॐ ऐं
ईक्लीं नमः २८। ॐ ऐं श्रूं नमः २९। ॐ ऐं ह्रीं नमः ३०।
ॐ ऐं झीं नमः ३१। ॐ ऐं क्लीं नमः ३२। ॐ ऐं क्लौं नमः
३३। ॐ ऐं फ्रूं नमः ३४। ॐ ऐं ह्रूं नमः ३५। ॐ ऐं क्लूं
नमः ३६। ॐ ऐं तीं नमः ३७।ॐ ऐं म्लूं नमः ३८। ॐ
ऐं हुं नमः ३९। ॐ ऐं स्लूं नमः ४०। ॐ ऐं औं नमः ४१
। ॐ ऐं ल्हौं नमः ४२। ॐ ऐं इली नमः ४३। ॐ ऐं यां
नमः ४४। ॐ ऐं थ्लीं नमः ४५। ॐ ऐं ल्हीं नमः ४६।
ॐ ऐं ग्लौं नमः ४७। ॐ ऐं ह्रौं नमः ४८। ॐ ऐं प्रां नमः
४९। ॐ ऐं क्रीं नमः ५०। ॐ ऐं क्लीं नमः ५१। ॐ ऐं न्लुं

नमः ५२। ॐ ऐं ह्रीं नमः ५३। ॐ ऐं ह्लौः नमः ५४। ॐ ऐं ह्रैं नमः ५५। ॐ ऐं भ्रं नमः ५६। ॐ ऐं सौं नमः ५७। ॐ ऐं श्रीं नमः ५८। ॐ ऐं प्सूं नमः ५९। ॐ ऐं द्रौं नमः ६०। ॐ ऐं स्त्रां नमः ६१। ॐ ऐं ह्स्लीं नमः ६२। ॐ ऐं स्ल्ल्रीं नमः ६३॥ इत्यष्टमोऽध्यायः॥ ८॥ ॐ ऐं रौं नमः १। ॐ ऐं क्लीं नमः २। ॐ ऐं म्लौं नमः ३। ॐ ऐं श्रौं नमः ४। ॐ ऐं ग्लीं नमः ५। ॐ ऐं ह्रौं नमः ६। ॐ ऐं ह्सौं नमः ७। ॐ ऐं ईं नमः ८। ॐ ऐं व्रूं नमः ९। ॐ ऐं श्रां नमः १०। ॐ ऐं ॡं नमः ११। ॐ ऐं आं नमः १२। ॐ ऐं श्रीं नमः १३। ॐ ऐं क्रौं नमः १४। ॐ ऐं मूं

नमः १५। ॐ ऐं क्लीं नमः १६। ॐ ऐं भ्रूं नमः १७। ॐ ऐं
ह्रौं नमः १८। ॐ ऐं क्रीं नमः १९। ॐ ऐं म्लीं नमः २०।
ॐ ऐं ग्लौं नमः २१। ॐ ऐं ह्सूं नमः २२। ॐ ऐं प्लीं न-
मः २३। ॐ ऐं ह्रौं नमः २४। ॐ ऐं ह्स्रां नमः २५। ॐ ऐं
स्हौं नमः २६। ॐ ऐं ल्लूं नमः २७। ॐ ऐं व्स्लीं नमः
२८। ॐ ऐं श्रीं नमः २९। ॐ ऐं स्तूं नमः ३०। ॐ ऐं च्रें
नमः ३१। ॐ ऐं वीं नमः ३२। ॐ ऐं क्ष्लूं नमः ३३। ॐ
ऐं श्लूं नमः ३४। ॐ ऐं क्रूं नमः ३५। ॐ ऐं क्रां नमः ३६
। ॐ ऐं ह्रौं नमः ३७। ॐ ऐं क्रां नमः ३८। ॐ ऐं स्क्लीं
नमः ३९। ॐ ऐं म्रूं नमः ४०। ॐ ऐं फ्रूं नमः ४१ ॥ ॥

इति नवमोऽध्यायः ॥९॥ ॐ ऐं श्रौं नमः १। ॐ ऐं
ह्रीं नमः २। ॐ ऐं व्लूं नमः ३। ॐ ऐं ह्रीं नमः ४। ॐ ऐं
म्लूं नमः ५। ॐ ऐं श्रौं नमः ६। ॐ ऐं ह्रीं नमः ७। ॐ ऐं
ग्लीं नमः ८। ॐ ऐं ह्रं नमः ९। ॐ ऐं धूं नमः १०। ॐ ऐं हुं
नमः ११। ॐ ऐं द्रौं नमः १२। ॐ ऐं श्रीं नमः १३। ॐ ऐं
त्रूं नमः १४। ॐ ऐं व्रूं नमः १५। ॐ ऐं फ्रें नमः १६। ॐ
ऐं ह्रां नमः १७। ॐ ऐं जुं नमः १८। ॐ ऐं सौः नमः १९।
ॐ ऐं स्लूं नमः २०। ॐ ऐं प्रें नमः २१। ॐ ऐं ह्स्वां नमः
२२। ॐ ऐं प्रीं नमः २३। ॐ ऐं फ्रां नमः २४। ॐ ऐं क्रीं न-
मः २५। ॐ ऐं श्रीं नमः २६। ॐ ऐं क्रां नमः २७। ॐ ऐं

सः नमः २८। ॐ ऐं क्लीं नमः २९। ॐ ऐं व्रें नमः ३०।
ॐ ऐं इं नमः ३१। ॐ ऐं ज्स्ह्लरीं नमः ३२॥ इति दशमो
ऽध्यायः ॥१०॥ ॐ ऐं श्रौं नमः १। ॐ ऐं क्रूं नमः २। ॐ
ऐं श्रीं नमः ३। ॐ ऐं ल्लीं नमः ४। ॐ ऐं प्रें नमः ५। ॐ
ऐं सौः नमः ६। ॐ ऐं स्हौं नमः ७। ॐ ऐं श्रूं नमः ८।
ॐ ऐं क्लीं नमः ९। ॐ ऐं स्क्लीं नमः १०। ॐ ऐं प्रीं नमः ११
। ॐ ऐं ग्लौं नमः १२। ॐ ऐं ह्रस्ह्रीं नमः १३। ॐ ऐं स्तौं
नमः १४। ॐ ऐं लीं नमः १५। ॐ ऐं म्लीं नमः १६। ॐ
ऐं स्तूं नमः १७। ॐ ऐं ज्स्ह्रीं नमः १८। ॐ ऐं फ्रूं नमः १९
। ॐ ऐं क्रूं नमः २०। ॐ ऐं ह्रीं नमः २१। ॐ ऐं ल्लूं न-

प्र०
मः २२। ॐ ऐं क्ष्म्रीं नमः २३। ॐ ऐं श्रूं नमः २४। ॐ ऐं
१३ इं नमः २५। ॐ ऐं जुं नमः २६। ॐ ऐं त्रैं नमः २७। ॐ ऐं
द्रूं नमः २८। ॐ ऐं ह्रौं नमः २९। ॐ ऐं क्लीं नमः ३०। ॐ ऐं
सूं नमः ३१। ॐ ऐं हौं नमः ३२। ॐ ऐं श्व्रं नमः ३३। ॐ
ऐं ब्रूं नमः ३४। ॐ ऐं स्फ्रूं नमः ३५। ॐ ऐं ह्रीं नमः ३६। ॐ
ऐं लं नमः ३७। ॐ ऐं ह्सौं नमः ३८। ॐ ऐं सें नमः ३९।
ॐ ऐं ह्रीं नमः ४०। ॐ ऐं ह्रीं नमः ४१। ॐ ऐं विं नमः ४२
। ॐ ऐं प्लीं नमः ४३। ॐ ऐं क्ष्म्क्लीं नमः ४४। ॐ ऐं त्स्रां न
वि० मः ४५। ॐ ऐं प्रं नमः ४६। ॐ ऐं म्लीं नमः ४७। ॐ ऐं
स्रूं नमः ४८। ॐ ऐं क्ष्मां नमः ४९। ॐ ऐं स्तूं नमः ५०। ॐ

ऐं स्हीं नमः ५१। ॐ ऐं थ्प्रीं नमः ५२। ॐ ऐं क्रौं नमः ५३।
ॐ ऐं श्रां नमः ५४। ॐ ऐं म्लीं नमः ५५॥ इत्येकादशोऽ
ध्यायः॥ ११॥ ॐ ऐं ह्रीं नमः १। ॐ ऐं ओं नमः २। ॐ ऐं
श्रीं नमः ३। ॐ ऐं ईं नमः ४। ॐ ऐं क्लीं नमः ५। ॐ ऐं क्रूं
नमः ६। ॐ ऐं श्रूं नमः ७। ॐ ऐं प्रां नमः ८। ॐ ऐं क्रूं नमः
९। ॐ ऐं दिं नमः १०। ॐ ऐं फ्रें नमः ११। ॐ ऐं हं नमः १२।
ॐ ऐं सः नमः १३। ॐ ऐं चें नमः १४। ॐ ऐं सूं नमः १५।
ॐ ऐं प्रीं नमः १६। ॐ ऐं व्लूं नमः १७। ॐ ऐं आं नमः १८
। ॐ ऐं औं नमः १९। ॐ ऐं ह्रीं नमः २०। ॐ ऐं क्रीं नमः
२१। ॐ ऐं द्रां नमः २२। ॐ ऐं श्रीं नमः २३। ॐ ऐं स्लीं

प्र० नमः २४। ॐ ऐं क्लीं नमः २५। ॐ ऐं स्लूं नमः २६।ॐ
१४ ऐं ह्रीं नमः २७। ॐ ऐं ब्लीं नमः २८। ॐ ऐं त्रों नमः २९
।ॐ ऐं ओं नमः ३०। ॐ ऐं श्रौं नमः ३१। ॐ ऐं ऐं नमः ३२
। ॐ ऐं प्रें नमः ३३। ॐ ऐं द्रूं नमः ३४। ॐ ऐं क्लूं नमः ३५।
ॐ ऐं औं नमः ३६।ॐ ऐं सूं नमः ३७। ॐ ऐं चैं नमः ३८
।ॐ ऐं ह्लूं नमः ३९। ॐ ऐं प्लीं नमः ४०। ॐ ऐं क्षां नमः ४१
॥इति द्वादशोऽध्यायः ॥१२॥ ॐ ऐं श्रौं नमः १। ॐ ऐं
व्रीं नमः २। ॐ ऐं ओं नमः ३। ॐ ऐं औं नमः ४। ॐ ऐं ह्रां
वि० नमः ५। ॐ ऐं श्रीं नमः ६। ॐ ऐं श्रां नमः ७। ॐ ऐं ओं
नमः ८। ॐ ऐं प्लीं नमः ९। ॐ ऐं सौं नमः १०। ॐ ऐं ह्रीं

नमः ११। ॐ ऐं क्रीं नमः १२। ॐ ऐं ह्लूं नमः १३। ॐ ऐं
क्लीं नमः १४। ॐ ऐं ह्रीं नमः १५। ॐ ऐं प्लीं नमः १६।
ॐ ऐं श्रीं नमः १७। ॐ ऐं ल्लीं नमः १८। ॐ ऐं श्रूं नमः
१९। ॐ ऐं ह्रीं नमः २०। ॐ ऐं त्रूं नमः २१। ॐ ऐं ह्रूं नमः
२२। ॐ ऐं ह्रां नमः २३। ॐ ऐं प्रीं नमः २४। ॐ ऐं ऊं
नमः २५। ॐ ऐं सूं नमः २६। ॐ ऐं ह्लौं नमः २७। ॐ
ऐं षौं नमः २८। ॐ ऐं आं नमः २९। ॐ ऐं ओं नमः ३०॥

इति त्रयोदशोऽध्यायः ॥१३॥

श्रीगणेशाय नमः ॥ ॥ अथ प्रयोगान्तराणि कात्या
यनीतन्त्रोक्तानि ॥ प्रतिश्लोकमाद्यन्तयोः प्रणवं ज

प्र० पेन्मन्त्रसिद्धिः ॥१॥ अग्रे सर्वत्र श्लोकपदं मंत्रोप
१५ लक्षणम् ॥ सप्रणवमनुलोमव्याहृतित्रयमादौ अ-
न्ते तु विलोमं तदित्येवं प्रतिश्लोकं कृत्वा शतावृत्त
पाठेऽतिशीघ्रं सिद्धिः ॥२॥ प्रतिश्लोकमादौ जात
वेदस इत्यृचं पठेत्सर्वकामसिद्धिः ॥३॥ अपमृत्यु-
वारणाय त्र्यंबकमन्त्रं पठेत् ॥ आदावंते च शतमि
त्यर्थः ॥ प्रति श्लोकं तन्मन्त्रजप इत्यन्यत्र ॥४॥ प्र
तिश्लोकं शूलेन पाहि नो देवीति पाठादपमृत्युनाशः
वि० ॥ अस्य केवलस्यापि श्लोकस्य लक्षमयुतं सहस्रं श
तं वा जपे अपमृत्युवारणम् ॥५॥ प्रतिश्लोकं शर-

णागतदीनार्तेति श्लोकं पठेत्सर्वकार्यसिद्धिः ॥ ६ ॥
प्रतिश्लोकं करोतु सा नः शुभेत्यर्द्धं पठेत्सर्वकार्यसि-
द्धिः ॥ ७ ॥ स्वाभीष्टवरप्राप्तये एवं देव्या वरं लब्ध्वेति
श्लोकं पठेत् ॥ ८ ॥ सर्वापत्तिवारणाय प्रतिश्लोकं दुर्गे
स्मृतेति पठेत् ॥ अस्य केवलस्यापि श्लोकस्य कार्या
नुसारेण लक्षमयुतं सहस्रं शतं वा जपः ॥ ९ ॥ सर्वा
बाधेत्यस्य लक्षजपे प्रतिश्लोकं पाठे वा श्लोकोक्तं
फलम् ॥ १० ॥ इत्थं यदायदा बाधेति श्लोकजपे म-
हामारीशांतिः ॥ ११ ॥ ततो वव्रे नृपो राज्यमितिमंत्र-
स्य जपे पुनः स्वराज्यलाभः ॥ १२ ॥ हिनस्ति दैत्यते

प्र॰ जांसि इत्यनेन सदीप बलिदाने घंटाबंधने च बाल-
१६ ग्रहशांतिः ॥ १३ ॥ आद्यावृत्तिमनुलोमेन पठित्वा ततो
विपरीतक्रमेण द्वितीयामनुलोमेन तृतीयामित्येव मावृत्ति
त्रयेण शीघ्रं कार्यसिद्धिः ॥ १४ ॥ सर्वापत्तिवारणाय दु-
र्गे स्मृतेत्यर्द्धं ततो यदंति यच्च दूरके इत्यृचं तदंते दा
रिद्र्यदुःखेत्यर्द्धमेवं कार्यानुसारेण लक्षमयुतं सहस्रं श
तं वा जपः ॥ १५ ॥ कांसोस्मीत्यृचं प्रतिश्लोकं पठे ल्ल-
क्ष्मीप्राप्तिः ॥ १६ ॥ प्रतिश्लोकमनृणा अस्मिन्नित्यृचं
वि॰ पठेहृणपरिहारः ॥ १७ ॥ मारणार्थमेवमुक्त्वा समुत्पत्ये
ति श्लोकं प्रतिश्लोकं पठेत् मारणोक्तावृत्तिभिः फल

सिद्धिः ॥१८॥ ज्ञानिनामपिचेतांसि इतिश्लोकजपमा
त्रेण सद्योमोहनमित्यनुभवसिद्धम् ॥ प्रतिश्लोकं त-
च्छ्लोकपाठेल्लवश्यम् ॥१९॥ रोगानशेषानिति श्लोक
स्य प्रतिश्लोकं पाठे सकलरोगनाशः ॥ तन्मात्रजपे
पि सः ॥२०॥ इत्युक्त्वा सा तदा देवी गंभीरेतिश्लोक
स्य प्रतिश्लोकं पाठे पृथग्जपे वा विद्याप्राप्तिर्वाग्वे
कृतनाशश्च ॥२१॥ भगवत्या कृतं सर्वमित्यादि द्वा
दशोत्तरशताक्षरो मंत्रः सर्वकामदः सर्वापत्तिवारण
श्च ॥२२॥ देवि प्रपन्नार्तिहरे इति श्लोकस्य यथा
कार्यं लक्षायुतसहस्रशतान्यतमसंख्याजपे प्रतिश्लो

प्र० कं पाठे वा सर्वापन्निवृत्तिः सर्वकामाप्तिश्च ॥ एषुप्र
१७ योगेषु प्रतिश्लोकं दीपाग्रे केवलमेव नमस्करणेऽति
शीघ्रं सिद्धिः ॥ प्रतिश्लोकं कामबीजसंपुटितस्य ए
कचत्वारिंशद्दिनं त्रिरावृत्तौ सर्वकामसिद्धिः ॥२३॥ ए
कविंशतिदिनपर्यन्तमुक्तरीत्या प्रत्यहं द्वादशावृत्तौ व
शीकरणम् ॥२४॥ मायाबीजसंपुटितस्य फट्पल्लवस
हितस्य सप्तदिनपर्यन्तं त्रयोदशावृत्तावुच्चाटनसिद्धिः
॥२५॥ ताहृश्यामेव दिनचतुष्टयमेकादशावृत्तौ सर्वोप
वि० द्रवनाशः ॥२६॥ एकोनपंचाशद्दिनपर्यंतं प्रतिश्लोकं
श्रीबीजसंपुटितस्य पंचदशावृत्तौ लक्ष्मीप्राप्तिः ॥२७॥

प्रतिश्लोकं वाग्बीजसंपुटितस्य शतावृत्त्या विद्या प्रा-
प्तिः ॥२८॥ ॥

अथ शतचण्डीविधिः ॥ ॥ शङ्करस्य भवान्या वा प्रा
सादनिकटे शुभम् ॥ मण्डपं द्वारवेद्याढ्यं कुर्यात्स
ध्वजतोरणम् ॥१॥ तत्रकुंण्डं प्रकुर्वीत प्रतीच्यां म
ध्यतोपि वा ॥ स्नात्वा नित्यक्रियां कृत्वा वृणुयाद्दश
वाडवान् ॥२॥ जितेन्द्रियान्सदाचारान्कुलीनान्सत्य
वादिनः ॥ [वाडवा ब्राह्मणाः] ॥ व्युत्पन्नांश्चण्डि
कापाठरताँल्लज्जादयावतः ॥३॥ मधुपर्कविधानेन
स्वर्णवस्त्रादिदानतः ॥ जपार्थमासनं मालां दद्यात्ते

प्र० भ्योऽपि भोजनम् ॥ ४ ॥ ते हविष्यान्नमश्नंतो मंत्रा
१८ र्थगतमानसाः ॥ भूमौ शयानाः प्रत्येकं जपेयुश्चण्डि
कास्तवम् ॥ ५ ॥ मार्कण्डेयपुराणोक्तं दशकृत्वः सचे
तसः ॥ नवार्णं चण्डिकामंत्रं जपेयुश्चायुतं पृथक् ॥ ६ ॥
[पृथक्संपुटकरणादिति शेषः] ॥ प्रत्येकं ब्राह्मणैरयु
तजपः कार्यः ॥ अष्टमी नवमी चतुर्दशी पौर्णमासीषु य-
था शतावृत्तिसमाप्तिर्भवति तथारंभः कर्त्तव्य इति सां
प्रदायिकाः ॥ यजमानः पूजयेच्च कन्यानां नवकंशुभ
वि० म् ॥ द्विवर्षाद्या दशाब्दान्ताः कुमारीः परिपूजयेत् ॥ १ ॥
तासां क्रमेण नामानि ॥ -कुमारी १, त्रिमूर्तिः २, कल्या

णी ३, रोहिणी ४, कालिका ५, चण्डिका ६, शांभवी ७, दुर्गा ८, सुभद्रा ९ इति ॥ नाममंत्रैस्तासां पूजा ॥ ॥ तत्र हीनाधिकाङ्गी कुष्ठव्रणयुता अंधा काणा कुरूपा केकरा कुबरी लोमयुग्देहा दासीजा रोहिणीत्येवमाद्या वर्ज्याः ॥ विप्रां सर्वेष्टसंसिद्ध्ये यशसे क्षत्रियोद्भवाम् ॥ वैश्यजां धनलाभाय पुत्राप्त्यै शूद्रजां यजेत् ॥ गंधपुष्पधूपदीपभक्ष्यभोज्यैर्यथाशक्ति वस्त्राभरणैश्च पूजयेत् ॥ द्विवर्षा सा कुमार्युक्ता त्रिमूर्तिर्हायनत्रिका ॥ चतुरब्दा तु कल्याणी पञ्चवर्षा तु रोहिणी ॥ १ ॥ षडब्दा कालिका प्रोक्ता चण्डिका सप्तहायना ॥ अष्टवर्षा शां

भवी स्याद्दुर्गा तु नवहायना ॥ सुभद्रा दशवर्षोक्ता नाममन्त्रैः प्रपूजयेत् ॥ तासामावाहने मन्त्रः प्रोच्यते शङ्करोदितः ॥ मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥ कुमारिकादिकन्यानां पूजामंत्रान्ब्रुवेऽधुना ॥ जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि ॥ पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते ॥ त्रिपुरां त्रिपुराधारां त्रिवर्षां ज्ञानरूपिणीम् ॥ त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥ कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम् ॥ कल्याणजननीं देवीं कल्याणीं पूजयाम्यहम् ॥ अणिमादि

गुणाधारामकाराद्यक्षरात्मिकाम् ॥ अनंतशक्तिकां ल-
क्ष्मीं रोहिणीं पूजयाम्यहम् ॥ कामचारीं शुभां कांताका
लचक्रस्वरूपिणीम् ॥ कामदां करुणोदारां कालिकां पू
जयाम्यहम् ॥ चण्डवीरां चंडमायां चण्डमुण्ड प्रभंजनी
म् ॥ पूजयामि सदा देवीं चंडिकां चंडविक्रमाम् ॥ सदा
नंदकरीं शांतां सर्वदेवनमस्कृताम् ॥ सर्वभूतात्मिकाल
क्ष्मीं शांभवीं पूजयाम्यहम् ॥ दुर्गमे दुस्तरे कार्ये भव
दुःखविनाशिनीम् ॥ पूजयामि सदा भक्त्या दुर्गां दु-
र्गार्तिनाशिनीम् ॥ सुंदरीं स्वर्णवर्णाभां सुखसौभाग्य
दायिनीम् ॥ सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम्

प्र० ॥ एतैर्मन्त्रैः पुराणोक्तैस्तां तां कन्यां समर्चयेत् ॥ इतिकु
२० मारिकाणां पूजनम् ॥ ॥ वेद्यां विरचिते रम्ये सर्वतोभ
द्रमण्डले ॥ घटं संस्थाप्य विधिना तत्रावाह्यार्चयेच्छि
वाम् ॥ तदग्रे कन्यकाश्चाऽपि पूजयेद्ब्राह्मणानपि ॥
उपचारैस्तु विविधैर्नवार्णावरणान्यपि ॥ ॐ कारः प्रथ
मं पीठं पूजयेत्सम्प्रदायतः ॥ पूर्वादिदिक्षु पीठस्य ग-
णेशादिचतुष्टयम् ॥ गणेशक्षेत्रपालौ च पादुके बटु
कास्त्रयः ॥ आग्नेय्यादिचतुर्दिक्षु पूज्यं देवीचतुष्टयम्
वि० ॥जया च विजया चैव जयंती चापराजिता ॥ पूर्वोक्त
यंत्रे पूर्वकोणे सरस्वतीसहितो ब्रह्मा श्रीसहितो विष्णु

नैर्ऋत्यामुमया शिवोवायव्यां षट्कोणे चक्रमध्यस्थ
मध्यबीजे श्रीमहालक्ष्मीः ॥ ह्रीं महाकाली ऐं महा
सरस्वती दक्षिणवामयोः ॥ उदक्सिंहो दक्षिणे महि
षः ॥ षट्कोणेषु नंदजारक्तदन्तिकाशाकंभरी दुर्गाभी
माभ्रामर्य्यः ॥ सबिन्दुनामाद्यवर्णताराद्याश्चासां नाममं
त्राः पूजादौ ॥ तारः प्रणवः ॥ अष्टत्रयेषु ब्रह्माणी
माहेश्वरी कौमारी वैष्णवी वाराही नारसिंही ऐन्द्री चा
मुण्डा उक्तरीत्या नाममन्त्रैः पूज्याः ॥ ततो विष्णुमा
यादि चतुर्विंशतिदेवताः प्रागादिक्रमेण केसरेषु पू-
ज्याः ॥ प्रतिपत्रंच केसरत्रयम् ॥ ताश्च विष्णुमाया १,

स॰ चेतना २, बुद्धि ३, निद्रा ४, क्षुधा ५, छाया ६, शक्ति ७
२१ तृष्णा ८, क्षान्ति ९, जाति १०, लज्जा ११, शान्ति १२,
श्रद्धा १३, कांति १४, लक्ष्मी १५, धृति १६, वृत्ति १७, स्मृ
ति १८, दया १९, तुष्टि २०, पुष्टि २१, मातृ २२, भ्रांति २३,
चिति २४, रूपा एतावत्यः ॥ सप्तशतीस्तवे पञ्चमाध्या
ये आसां चतुर्विंशतीनां न पाठ इति न भ्रमितव्यम्
॥ कात्यायनीतंत्रविरोधात् ॥ नालमूलेतु संपूज्य मा
धवादिचतुष्टयम् ॥ आधारः कूर्मशेषौ च चतुर्थी पृथि-
वि॰ वी नृप ॥ गृहकोणेषु गणेशः क्षेत्रपालो बटुको यो-
गिन्यः ॥ प्रागादिदिक्षु इंद्राद्याश्चेति ॥ एवं चतुर्दिनं

कुर्यात् ॥ तत्र प्रथमेऽह्नि एकावृत्तिर्द्वितीये द्वे तृतीये तिस्रश्चतुर्थे चतस्र इति ॥ पञ्चमे होमः ॥ होमद्रव्याणि ॥ पायसान्नैस्त्रिमध्वक्तैर्द्राक्षारंभाफलादिभिः ॥ मातुलिंगैरिक्षुखण्डैर्नालिकेरयुतैस्तिलैः ॥ जातीफलैराम्रफलैरन्यैर्मधुरवस्तुभिः ॥ सप्तशत्या दशावृत्त्या प्रतिमंत्रं हुतं चरेत् ॥ अयुतं च नवार्णेन स्थापितेऽग्नौ विधानतः ॥ कृत्वापूजान्तु देवानां होमं तन्नाममंत्रतः ॥ कृत्वा पूर्णाहुतिं सम्यग्देवमग्निं विसृज्य च ॥ अभिषिंचेच्च यष्टारं विप्रौघः कलशोदकैः ॥ निष्कं सुवर्णमथवा प्रत्येकं दक्षिणां दिशेत् ॥ भोजयेच्च शतं विप्रान्भक्ष्यभोज्यैः

दे॰ पृथग्विधैः ॥ तेभ्योपि दक्षिणां दत्त्वा गृह्णीयादाशिष-
२२ स्तथा ॥ एवं कृते जगद्वश्यं सर्वे नश्यंत्युपद्रवाः ॥ ॥

॥ इति शतचण्डी विधिः ॥

श्रीगणेशाय नमः ॥ ॥ अद्येत्यादि॰ श्रीमहाकाली
महालक्ष्मीमहासरस्वतीदेवताप्रीत्यर्थं श्रीचण्डीसप्त
शतीपाठाख्यं कर्म करिष्ये ॥ तदङ्गत्वेनादौ कवचा-
र्गलाकीलकपठनमाद्यन्तयोरष्टोत्तरशतसंख्यनवार्णज
पपूर्वकं क्रमेण रात्रिसूक्तदेवीसूक्तपठनमंते रहस्य
क॰ त्रयपठनंच करिष्ये ॥ इति संकल्प्य ॥ प्रथमं नमो
देव्यै महादेव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भ

द्राये नियताः प्रणताः स्मंताम् ॥ इति मंत्रेण पंचोपचारैः पूजां कुर्यात् ॥ श्रीरस्तु ॥

श्रीगणेशाय नमः ॥

ॐ नमश्चण्डिकायै॥

मार्कण्डेय उवाच ॥

ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ॥ यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥ १ ॥

॥ ॥ ब्रह्मोवाच ॥ ॥

दे०

२३

अस्तिगुह्यतमंविप्रसर्वभूतोपकारकम्॥देव्यास्तुकवचंपुण्यंतच्छृणुष्वमहामुने॥

क०

प्रथमं शैलपुत्रीच

द्वितीयं ब्रह्मचारिणी ॥



तृतीयं चन्द्रघण्टेति



कूष्माण्डेति चतुर्थकम् ॥ ३ ॥

पंचमं स्कन्दमातेति

षष्ठं कात्यायनीतिच ॥



सप्तमं कालरात्रीति

महागौरीति चाष्टमम् ॥ ४ ॥

नवमं सिद्धिदात्री च
नव दुर्गाः प्रकीर्तिताः
॥ उक्तान्येतानि नामा
नि ब्रह्मणैव महात्म
ना ॥ ५ ॥ अग्निनाद
ह्यमानस्तु शत्रुमध्ये
गतो रणे ॥ विषमे दु
र्गमे चैव भयार्ताश्श
रणं गताः ॥ ६ ॥ न
तेषां जायते किंचि-

दे॰ दशुभं रणसंकटे ॥ नापदं तस्य पश्यामि शोकदुःखभ
२८ यं न हि ॥ ७ ॥ यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः
प्रजायते ॥ ये त्वां स्मरंति देवेशि रक्षसे तान्न संशयः
॥ ८ ॥ प्रेतसंस्था तु चामुण्डा वाराही महिषासना ॥ ऐ
न्द्री गजसमारूढा वैष्णवी गरुडासना ॥ ९ ॥ माहेश्व-
री वृषारूढा कौमारी शिखिवाहना ॥ लक्ष्मीः पद्मास
ना देवी पद्महस्ता हरिप्रिया ॥ १० ॥ श्वेतरूपधरा देवी
ईश्वरी वृषवाहना ॥ ब्राह्मी हंससमारूढा सर्वाभरणभू-
क॰ षिता ॥ ११ ॥ इत्येता मातरः सर्वाः सर्वयोगसमन्वि
ताः ॥ नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥ १२ ॥

दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः॥



दे॰ शंखं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥ खे
२९ टकं तोमरं चैव परशुं पाशमेवच ॥ १३ ॥ कुन्ता
युधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ॥ दैत्यानां
देहनाशाय भक्तानामभयाय च ॥ १४ ॥ धार-
यन्त्यायुधानीत्थं देवानां च हिताय वै ॥ नमस्ते
स्तु महारौद्रे महाघोरपराक्रमे ॥ १५ ॥ महाब
ले महोत्साहे महाभयविनाशिनि ॥ त्राहि मां दे
क॰ वि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनी ॥ १६ ॥

प्राच्यां रक्षतु मामैन्द्री आग्नेय्यां भयनाशिनी ॥

दे० ३० दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ॥१७॥

क०

प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी ॥

उदीच्यां पातु कौमारी ईशान्यां शूलधारिणी ॥ १८ ॥

ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ॥



एवं दश दिशोरक्षे-
च्चामुण्डा शववाह-
ना ॥ १९ ॥ जयामे
चाग्रतः पातु विजया
पातु पृष्ठतः ॥ अजि
ता वामपार्श्वे च द
क्षिणे चापराजिता ॥
॥ २० ॥ शिखामुद्द्यो-
तिनी रक्षेदुमा मूर्ध्नि
व्यवस्थिता ॥ माला

धरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी ॥ २१ ॥ त्रिने
त्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥ शंखिनी
चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ॥ २२ ॥ कपोलौ
कालिका रक्षेत्कर्णमूले तु शाङ्करी ॥ नासिकायांसु
गन्धा च उत्तरोष्ठे च चर्चिका ॥ २३ ॥ अधरे चामृत
कला जिह्वायां च सरस्वती ॥ दन्तान्रक्षतु कौमारी
कण्ठदेशे तु चण्डिका ॥ २४ ॥ घण्टिकां चित्रघण्टा
च महामाया च तालुके ॥ कामाक्षी चिबुकं रक्षेद्वाचं
मे सर्वमङ्गला ॥ २५ ॥ ग्रीवायां भद्रकाली च पृष्ठवंशे
धनुर्धरी ॥ नीलग्रीवा बहिः कण्ठे नलिकां नलकूबरी ॥

देवी ॥२६॥ स्कन्धयोः खड्गिनी रक्षेद्बाहू मे वज्रधारिणी ॥
३३ हस्तयोर्दण्डिनी रक्षेदम्बिका चांगुलीषु च ॥२७॥ न
खाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ॥ स्तनौ रक्षे
न्महादेवी मनश्शोकविनाशिनी ॥२८॥ हृदये ललि
ता देवी उदरे शूलधारिणी ॥ नाभौ च कामिनी रक्षेद्गु
ह्यं गुह्येश्वरी तथा ॥२९॥ पूतना कामिका मेढ्रं गुदे
महिषवाहिनी ॥ कट्यां भगवती रक्षेज्जानुनी विन्ध्य
वासिनी ॥ ३०॥ जंघे महाबला रक्षेत्सर्वकामप्रदायि
कु० नी ॥ गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी ॥३१॥
पादांगुलीषु श्रीरक्षेत्पादाधस्तलवासिनी ॥ नखान्दंष्ट्रा

कराली च केशांश्चैवोर्ध्वकेशिनी ॥ ३२॥ रोमकूपेषुकौ
मारी त्वचं वागीश्वरी तथा ॥ रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ॥ ३३ ॥ अन्त्राणि कालरात्रिश्च पित्तं
च मुकुटेश्वरी ॥ पद्मावती पद्मकोशे कफे चूडामणिस्त
था ॥ ३४॥ ज्वालामुखी नखज्वालामभेद्या सर्वसंधिषु॥
शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ॥ ३५॥ अहं
कारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥ प्राणापानौ तथा
व्यानमुदानं च समानकम् ॥ ३६ ॥ वज्रहस्ता च मे रक्षे
त्प्राणकल्पं च शोभना ॥ रसे रूपे च गन्धे च शब्दे स्पर्शे
च योगिनी ॥३७॥ सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी स

दे० दा ॥ आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ॥३८॥ य
३४ शः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी ॥ गोत्रमि
न्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके ॥ ३९॥ पुत्रान्रक्षे
न्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥ पन्थानं सुपथा रक्षेन्मा
र्गं क्षेमकरी तथा ॥ ४०॥ राजद्वारे महालक्ष्मीर्विजयास
र्वतः स्थिता ॥ रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु
॥ ४१॥ तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥ पद
मेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ॥ ४२॥ कवचेना
क० वृतो नित्यं यत्रयत्रैव गच्छति ॥ तत्रतत्रार्थलाभश्च वि
जयःसार्वकामिकः ॥ ४३॥ यंयं चिन्तयते कामं तंतं प्रा-

प्नोति निश्चितम् ॥ परमैश्वर्यमतुलं प्राप्स्यते भूतले
पुमान् ॥४४॥ निर्भयो जायते मर्त्यः संग्रामेष्वपराजि
तः ॥ त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥
॥४५॥ इदं तु देव्याः कवचं देवानामपि दुर्लभम् ॥
यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ॥ ४६ ॥
दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः ॥ जीवेद्व
र्षशतं साग्रमपमृत्युविवर्जितः ॥ ४७ ॥ नश्यन्ति व्या
धयः सर्वे लूताविस्फोटकादयः ॥ स्थावरं जंगमं चैव
कृत्रिमं चापि यद्विषम् ॥ ४८ ॥ अभिचाराणि सर्वा
णि मंत्रयंत्राणि भूतले ॥ भूचराः खेचराश्चैव जलजा

दे० श्चोपदेशिकाः ॥ ४९ ॥ सहजा कुलजा माला डाकिनी
३५ शाकिनी तथा ॥ अन्तरिक्षचरा घोरा डाकिन्यश्च म
हाबलाः ॥ ५० ॥ ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः
॥ ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ॥ ५१ ॥ न
श्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ॥ मानोन्न
तिर्भवेद्राज्ञस्तेजोवृद्धिकरं परम् ॥ ५२ ॥ यशसा वर्ध
ते सोऽपि कीर्तिमण्डितभूतले ॥ जपेत्सप्तशतीं चण्डीं
कृत्वा तु कवचं पुरः ॥ ५३ ॥ यावद्भूमंडलं धत्ते सशैल
क० वनकाननम् ॥ तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौ
त्रिकी ॥ ५४ ॥ देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम्

॥ प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥५५॥

अ० लभते परम रूपं शिवेन सह मोदते ॥ ५६ ॥ इति वा
३६ राहपुराणे हरिहरब्रह्मविरचितं देव्याः कवचं समाप्तम्
॥ श्रीजगदंबार्पणमस्तु ॥ ॥ ॐ नमश्चण्डिकायै ॥
जयन्ती मङ्गला काली भद्रकाली कपालिनी । दुर्गाक्ष
मा शिवा धात्री स्वाहा स्वधा नमोस्तु ते ॥ १ ॥ जय त्वं
देवि चामुण्डे जयभूतार्तिहारिणि ॥ जय सर्वगते दे
वि कालरात्रि नमोस्तु ते ॥ २ ॥ मधुकैटभविद्राविवि
धातृवरदे नमः ॥ रूपं देहि जयं देहि यशो देहि द्विषो
स्तो० जहि ॥ ३ ॥ महिषासुरनिर्णाशि भक्तानां सुखदे नमः
॥ रूपं देहि जयं देहि यशो देहि द्विषोजहि ॥ ४ ॥ रक्त

बीजवधे देवि चंडमुंड विनाशिनि ॥ रूपं देहि जयं देहि
यशो देहि द्विषो जहि ॥ ५ ॥ शुम्भस्यैव निशुम्भस्य
धूम्राक्षस्य च मर्दिनि ॥ रूपं देहि जयं देहि यशो
देहि द्विषो जहि ॥ ६ ॥ वन्दितांघ्रियुगे देवि सर्वसौ
भाग्यदायिनि ॥ रूपं देहि जयं देहि यशो देहि द्विषो
जहि ॥ ७ ॥ अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि
॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ८ ॥
नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ॥ रूपं दे
हि जयं देहि यशो देहि द्विषो जहि ॥ ९ ॥ स्तुवद्भ्यो
भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ॥ रूपं देहि ज

 यं देहि यशो देहि द्विषो जहि ॥ १० ॥ चण्डिके सततं
 ये त्वामर्चयंतीह भक्तितः ॥ रूपं देहि जयं देहि यशो
देहि द्विषो जहि ॥ ११ ॥ देहि सौभाग्यमारोग्यं देहि मे
परमं सुखम् ॥ रूपं देहि जयं देहि यशो देहि द्विषो ज
हि ॥ १२ ॥ विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १३ ॥ विधे
हि देवि कल्याणं विधेहि परमां श्रियम् ॥ रूपं देहि ज
 यं देहि यशो देहि द्विषो जहि ॥ १४ ॥ सुरासुरशिरोर
त्ननिघृष्टचरणेम्बिके ॥ रूपं देहि जयं देहि यशो देहि
द्विषो जहि ॥ १५ ॥ विद्यावन्तं यशस्वन्तं लक्ष्मीवंतं

जनं करु ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि
॥ १६ ॥ प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ॥ रू
पं देहि जयं देहि यशो देहि द्विषो जहि ॥ १७ ॥ चतु
र्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ॥ रूपं देहि जयं देहि
यशो देहि द्विषो जहि ॥ १८॥ कृष्णेन संस्तुते देवि श
श्वद्भक्त्या सदाम्बिके ॥ रूपं देहि जयं देहि यशो दे
हि द्विषो जहि ॥ १९॥ हिमाचलसुतानाथसंस्तुते पर
मेश्वरि ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि
॥२०॥ इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ॥ रूपं दे
हि जयं देहि यशो देहि द्विषो जहि ॥ २१ ॥ देवि प्र-

चण्डदोर्दण्डदैत्यदर्पविनाशिनि ॥ रूपं देहि जयं देहि
यशो देहि द्विषो जहि ॥ २२ ॥ देवि भक्तजनोद्दामद
त्तानन्दोदयेम्बिके ॥ रूपं देहि जयं देहि यशो देहि द्वि
षो जहि ॥ २३ ॥ पत्नीं मनोरमां देहि मनोवृत्तानुसा-
रिणीम् ॥ तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥
॥ २४ ॥ इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥
स तु सप्तशतीसंख्यावरमाप्नोति सम्पदाम् ॥ २५ ॥
इति मार्कण्डेयपुराणे अर्गलास्तोत्रं समाप्तम् ॥ २ ॥

ॐ नमश्चण्डिकायै ॥ ॥ मार्कण्डेय उवाच ॥ ॥ वि
शुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ॥ श्रेयःप्राप्ति

निमित्ताय नमः सोमार्द्धधारिणे ॥ १ ॥ सर्वमेतद्विजा-
नीयान्मन्त्राणामपिकीलकम् ॥ सोपि क्षेममवाप्नोति
सततं जाप्यतत्परः ॥ २ ॥ सिध्यन्त्युच्चाटनादीनि वस्तू
नि सकलान्यपि ॥ एतेन स्तुवतां देवीं स्तोत्रमात्रेण सि
ध्यति ॥ ३ ॥ न मन्त्रं नौषधं तत्र न किञ्चिदपि विद्य
ते ॥ विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥ ४
॥ समग्राण्यपि सिद्ध्यंति लोकशङ्कामिमां हरः ॥ कृत्वा
निमंत्रयामास सर्वमेवमिदं शुभम् ॥ ५ ॥ स्तोत्रं वै च-
ण्डिकायास्तु तच्च गुप्तं चकार सः ॥ समाप्नोति सुपुण्येन
तां यथावन्नियन्त्रणाम् ॥ ६ ॥ सोपि क्षेममवाप्नोति स-

र्वमेव न संशयः ॥ कृष्णायां वा चतुर्दश्यामष्टम्यां वा स
माहितः ॥ ७ ॥ ददाति प्रतिगृह्णाति नान्यथैषा प्रसि-
द्ध्यति ॥ इत्थं रूपेण कीलेन महादेवेन कीलितम् ॥ ८
॥ यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम् ॥ स
सिद्धः सगणस्सोपि गन्धर्वो जायते नरः ॥ ९ ॥ न चैवा
प्यटतस्तस्य भयं क्वापि हि जायते ॥ नाऽपमृत्युवशंया
ति मृतो मोक्षमवाप्नुयात् ॥ १० ॥ ज्ञात्वा प्रारभ्य कुर्वी
त न कुर्वाणो विनश्यति ॥ ततो ज्ञात्वैव सम्पन्नमिद
म्प्रारभ्यते बुधैः ॥ ११ ॥ सौभाग्यादि च यत्किञ्चिद्दृश्य
ते ललनाजने ॥ तत्सर्वं त्वत्प्रसादेन तेन जाप्यमिदंशु

भम् ॥ १२ ॥ शनैस्तु जाप्यमानेऽस्मिं स्तोत्रे सम्पत्तिरु

च्चकैः ॥ भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥१३

॥ ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः ॥ शत्रुहा

निः परो मोक्षः स्तूयते सा न किं जनैः ॥ १४ ॥ इति

भगवत्याः कीलकस्तोत्रं समाप्तम् ॥ ३ ॥ श्रीगणप

तिर्जयति ॥ ॥ ॐ अस्य श्री नवार्णमंत्रस्य ॥ ब्र-

ह्मविष्णुरुद्रा ऋषयः ॥ गायत्र्युष्णिगनुष्टुभश्छंदां-

सि ॥ श्रीमहाकाली महालक्ष्मी महासरस्वत्यो देवताः

॥ ऐं बीजम् ॥ ह्रीं शक्तिः ॥ क्लीं कीलकम् ॥ श्रीमहा

काली महालक्ष्मीमहासरस्वती प्रीत्यर्थं जपे विनियोगः

॥ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि ॥ गायत्र्युष्णि
गनुष्टुप्छंदोभ्यो नमः मुखे ॥ महाकालीमहालक्ष्मीम
हासरस्वतीदेवताभ्यो नमः हृदि ॥ ऐं बीजाय नमः गु
ह्ये ॥ ह्रीं शक्तये नमः पादयोः ॥ क्लीं कीलकाय नमः
नाभौ ॥ इति मूलेन करौ संशोध्य ॥ ॐ ऐं अंगुष्ठा
भ्यां नमः ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ ॐ क्लीं मध्य
माभ्यां नमः ॥ ॐ चामुण्डायै अनामिकाभ्यां नमः
॥ ॐ विच्चे कनिष्ठिकाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं चामु
ण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदया
दि ॥ ततोऽक्षरन्यासः ॥ ॐ ऐं नमः शिखायाम् ॥

ॐ ह्रीं नमः दक्षिणनेत्रे ॥ ॐ क्लीं नमः वामनेत्रे ॥
ॐ चां नमः दक्षिणकर्णे ॥ ॐ मुं नमः वामकर्णे
॥ ॐ डां नमः दक्षिणनासायाम् ॥ ॐ यैं नमः वा
मनासायाम् ॥ ॐ विं नमः मुखे ॥ ॐ च्चें नमः गु
ह्ये ॥ एवं विन्यस्याष्टवारं मूलेन व्यापकं कुर्यात्॥
ॐ ऐं प्राच्यैनमः ॥ ॐ ऐं आग्नेय्यै नमः ॥ ॐ ह्रीं
दक्षिणायै नमः ॥ ॐ ह्रीं नैर्ऋत्यै नमः ॥ ॐ क्लीं प्र
तीच्यै नमः ॥ ॐ क्लीं वायव्यै नमः ॥ ॐ चामु
ण्डायै उदीच्यै नमः ॥ ॐ विच्चे ईशान्यै नमः ॥
ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे ऊर्ध्वायै नमः॥ ॐ

ऐं ह्रीं क्लीं चामुंडायै विच्चे भूम्यै नमः ॥ अथ ध्यानम्
॥ खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुंडीं शिरः शं
खं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृताम् ॥ नी-
लाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां याम
स्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभम् ॥ १॥
अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुः कुंडिकां
दण्डं शक्तिमसिं च चर्मजलजं घंटां सुराभाजनम्
॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्
॥ २ ॥ घंटाशूलहलानि शंखमुसले चक्रं धनुः सा

यकं हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्र भाम् ॥ गौरीदेहसमुद्भवां त्रिनयनामाधारभूतां महा पूर्वामत्रसरस्वतीमनुभजे शुंभादिदैत्यार्दिनीम् ॥ ३ ॥ अष्टोत्तरशतसंख्यया मंत्रराजं जपेत् ॥ इति नवार्ण विधिः ॥ ॥ अथ रात्रिसूक्तम् ॥ ॥ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ १ ॥ ब्रह्मोवाच ॥ ॥ त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥ सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥ ॥ २ ॥ अर्धमात्रा स्थिता नित्या यानुच्चार्या विशे

रा० षतः ॥ त्वमेव संध्या सावित्री त्वं देवि जननी परा ॥
४२ ॥ ३ ॥ त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥
त्वयैतत्पाल्यते देवि त्वमत्स्यंते च सर्वदा ॥ ४ ॥विं
सृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥ तथासं
हृतिरूपांते जगतोऽस्य जगन्मये ॥ ५ ॥ महाविद्या
महामाया महामेधा महास्मृतिः ॥ महामोहा च भ
वती महादेवी महासुरी ॥ ६ ॥ प्रकृतिस्त्वं च सर्व
स्य गुणत्रयविभाविनी ॥ कालरात्रिर्महारात्रिर्मोहरा
सू० त्रिश्च दारुणा ॥ ७ ॥ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं
बुद्धिर्बोधलक्षणा ॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं

शांतिः क्षांतिरेव च ॥ ८ ॥ खड्गिनी शूलिनी घोरा
गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाण
भुशुंडी परिघायुधा ॥ ९ ॥ सौम्या सौम्यतराशेषसौ
म्येभ्यस्त्वतिसुंदरी ॥ परा पराणां परमा त्वमेव पर
मेश्वरी ॥ १० ॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वा ऽ
खिलात्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं
स्तूयसे तदा ॥ ११ ॥ यया त्वया जगत्स्रष्टा जग
त्पात्यत्ति यो जगत् ॥ सोपि निद्रावशं नीतः क
स्त्वां स्तोतुमिहेश्वरः ॥ १२ ॥ विष्णुः शरीरग्रह
णमहमीशान एव च ॥ कारितास्ते यतो तस्त्वा

रा०
४३

कः स्तोतुं शक्तिमान्भवेत् ॥ १३ ॥ सा त्वमित्थं प्र
भावैः स्वैरुदारैर्देवि संस्तुता ॥ मोहयैतौ दुराधर्षाव
सुरौ मधुकैटभौ ॥ १४ ॥ प्रबोधं च जगत्स्वामी नीय
तामच्युतो लघु ॥ बोधश्च क्रियतामस्य हंतुमेतौ म
हासुरौ ॥ १५ ॥ इति रात्रिसूक्तं समाप्तम् ॥ ॥

सू०

इति

रात्रि सूक्तं समाप्तम्.

अथ दुर्गासप्तशती।

अध्याय:१



ॐ श्रीगणेशाय नमः ॥ ॥ अथ सप्तशती न्यासाः ॥ अथ प्रथममध्यमोत्तमचरित्राणां ब्रह्मविष्णुरुद्रा ऋषयः ॥ श्रीमहाकाली महालक्ष्मी महासरस्वत्यो देवताः ॥ गायत्र्युष्णिगनुष्टुभश्छंदांसि ॥ नंदा शाकंभरीभीमाः शक्तयः ॥ रक्तदंतिकादुर्गाभ्रामर्यो बीजानि ॥ अग्निर्वायुः सूर्यस्तत्त्वानि ॥ ऋग्यजुः सामवेदाध्यानानि ॥ सकलकामना सिद्धये श्रीमहाकालीमहालक्ष्मीमहासरस्वती देवताप्रीत्यर्थं जपे विनियोगः ॥ तत्रादौ न्यासाः ॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी

बाण भुशुंडी परिघायुधा ॥ अंगुष्ठाभ्यां नमः॥ शू
लेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घंटा
स्वनेन नः पाहि चापज्यानिस्वनेन च ॥ तर्जनी-
भ्यां नमः॥ प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष द
क्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि॥
मध्यमाभ्यां नमः॥ सौम्यानि यानि रूपाणि त्रैलो
क्ये विचरंतिते ॥ यानि चात्यर्थघोराणि तैरक्षा-
अ० स्मांस्तथा भुवम् ॥ अनामिकाभ्यां नमः॥ खड्ग
शूलगदादीनि यानि चास्त्राणि तेंबिके ॥ करपल्ल
वसंगीनि तैरस्मान्रक्ष सर्वतः॥ कनिष्ठिकाभ्यां न

मः ॥ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भये
भ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते ॥ करतल
करपृष्ठाभ्यां नमः ॥ एवं हृदयादि ॥ खड्गिनी शूलि
नी घोरा॰ हृदयाय नमः ॥ शूलेन पाहि नो देवि॰ शि
रसे स्वाहा ॥ प्राच्यां रक्ष प्रतीच्यां॰ शिखायै वषट्॥
सौम्यानि यानि रूपाणि॰ कवचाय हुं ॥ खड्गशूलग
दादीनि॰ नेत्रत्रयाय वौषट् ॥ सर्वस्वरूपे सर्वेशे॰
अस्त्राय फट् ॥ अथ ध्यानम् ॥ विद्युद्दामसमप्रभां मृ
गपतिस्कंधस्थितां भीषणां कन्याभिः करवालखेट
विलसद्धस्ताभिरासेविताम् ॥ हस्तैश्चक्रधरालिखेट

विशिखांश्चापं गुणं तर्जनीं बिभ्राणामनलात्मिकांश
शिधरां दुर्गां त्रिनेत्रां भजे ॥ १॥ इति ध्यानम् ॥ प्रथ
मचरित्रस्य ब्रह्मा ऋषिः ॥ महाकाली देवता ॥ गा
यत्री छन्दः ॥ नंदा शक्तिः ॥ रक्तदंतिका बीजम् ॥
अग्निस्तत्त्वम् ॥ ऋग्वेदः स्वरूपम् ॥ श्रीमहाकाली
प्रीत्यर्थे प्रथमचरित्रजपे विनियोगः ॥ अथ ध्यान
म् ॥ खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुंडीं शि
रः शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृताम्
॥ नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालि-
कां यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभम्

॥ ॐ नमश्चण्डिकायै ॥



॥ मार्कण्डेयउवाच ॥ मं॰ १ ॥

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥ नि
शामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ मं० २ ॥ १
॥ महामायानुभावेन यथा मन्वंतराधिपः ॥ स ब-
भूव महाभागः सावर्णिस्तनयो रवेः ॥ मं० ३ ॥ २ ॥
स्वारोचिषेंऽतरे पूर्वं चैत्रवंशसमुद्भवः ॥ सुरथो ना
म राजाऽभूत्समस्ते क्षितिमण्डले ॥ मं० ४ ॥ ३ ॥
तस्य पालयतः सम्यक्प्रजाः पुत्रानिवौरसान् ॥ ब
भूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ॥ मं० ५
॥ ४ ॥ तस्यतैरभवद्युद्धमतिप्रबलदण्डिनः ॥ न्यू
नैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥ मं० ६ ॥

स० ॥५॥ ततःस्वपुरमायातो
४९ निजदेशाधिपोऽभवत्॥
आक्रान्तःस महाभागस्तै
स्तदा प्रबलारिभिः॥मं०७
॥६॥ अमात्यैर्बलिभिर्दुष्टै
र्दुर्बलस्य दुरात्मभिः॥को
शो बलं चापहृतं तत्रापि
अ० स्वपुरे ततः॥मं०८॥७॥ततो
१ मृगयाव्याजेन हृतस्वाम्यःस
भूपतिः॥एकाकी हयमारुह्य

जगाम गहनं वनम् ॥ मं० १ ॥ ८ ॥ स तत्राश्रममद्राक्षीद्विजवर्यस्य मेधस



स॰
५०
॥ प्रशांतश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥ मं॰ १०॥
॥ ९॥ तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः ॥ इत
श्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे ॥ मं॰ ११ ॥ १०॥ सोऽ
चिंतयत्तदा तत्र ममत्वाकृष्टचेतनः ॥ मत्पूर्वैः पालितं पू
र्वं मयाहीनं पुरं हि तत् ॥ मं॰ १२॥ ११ ॥ मद्भृत्यैस्तैरस
द्वृत्तैर्धर्मतः पाल्यते न वा ॥ न जाने स प्रधानो मे शूर
हस्ती सदामदः ॥ मं॰ १३ ॥ १२॥ मम वैरिवशं यातः का
अ॰ न्भोगानुपलप्स्यते ॥ ये ममानुगता नित्यं प्रसादधनभो
१ जनैः ॥ मं॰ १४ ॥ १३ ॥ अनुवृत्तिं ध्रुवं तेऽद्य कुर्वंत्यन्य
महीभृताम् ॥ असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं

व्ययम् ॥ मं॰ १५ ॥ १४ ॥ संचितः सोऽतिदुःखेन क्षयं
कोशो गमिष्यति ॥ एतच्चान्यच्च सततं चिंतयामास
पार्थिवः ॥ मं॰ १६ ॥ १५ ॥ तत्र विप्राश्रमाभ्यासे वैश्यमे
कं ददर्श सः ॥ स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽ
त्र कः ॥ मं॰ १७ ॥ १६ ॥ सशोक इव कस्मात्त्वं दुर्मना इ
व लक्ष्यसे ॥ इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदित
म् ॥ मं॰ १८ ॥ १७ ॥ प्रत्युवाच स तं वैश्यः प्रश्रयावन-
तो नृपम् ॥ मं॰ १९ ॥ ॥ वैश्य उवाच ॥ ॥ मं॰ २०
॥ समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ॥ मं॰ २१
॥ १८ ॥ पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ॥ विहीन

स॰ श्च धनैर्दारैः पुत्रैरादाय मे धनम् ॥ मं॰ २२ ॥ १९ ॥ वनम
५१ भ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ॥ सोहं न वेद्मि पु
त्राणां कुशलाकुशलात्मिकाम् ॥ मं॰ २३ ॥ २० ॥ प्रवृत्तिं
स्वजनानां च दाराणां चात्र संस्थितः ॥ किं नु तेषां गृ
हे क्षेममक्षेमं किं नु सांप्रतम् ॥ मं॰ २४ ॥ २१ ॥ कथं ते
किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः ॥ मं॰ २५ ॥ ॥
राजोवाच ॥ मं॰ २६ ॥ यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारा
दिभिर्धनैः ॥ मं॰ २७ ॥ २२ ॥ तेषु किं भवतः स्नेहमनुब-
अ॰ ध्नाति मानसम् ॥ मं॰ २८ ॥ वैश्य उवाच ॥ मं॰ २९ ॥ ए
१ वमेतद्यथा प्राह भवानस्मद्गतं वचः ॥ २३ ॥ किं करोमि

न बध्नाति मम निष्ठुरतां मनः ।। मं० ३०।। यैः सन्त्यज्य पि
तृस्नेहं धनलुब्धैर्निराकृतः ।। २४।। पतिस्वजनहार्दं च
हार्दितेष्वेव मे मनः ।। मं० ३१ ।। किमेतन्नाभिजानामि
जानन्नपि महामते ।। २५ ।। यत्प्रेमप्रवणं चित्तं विगु
णेष्वपि बंधुषु ।। मं० ३२।। तेषां कृते मे निःश्वासोदौ
र्मनस्यं च जायते ।। मं० ३३ ।। २६।। करोमि किं यन्न
मनस्तेष्वप्रीतिषु निष्ठुरम् ।। मं० ३४ ।। मार्कण्डेय
उवाच ।। मं० ३५ ।। ततस्तौ सहितौ विप्र तं मुनिं
समुपस्थितौ ।। मं० ३६ ।। २७ ।। समाधिर्नाम वै-
श्योऽसौ स च पार्थिवसत्तमः ।। मं० ३७ ।।

कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम् ॥ २८॥

उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥ मं० ३८॥
राजोवाच ॥ मं० ३९ ॥ भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं
वदस्व तत् ॥ मं० ४० ॥ २९ ॥ दुःखाय यन्मे मनसः
स्व चित्तायत्ततां विना ॥ मं० ४१॥ ममत्वं गतराज्यस्य
राज्यांगेष्वखिलेष्वपि ॥ ३०॥ जानतोपि यथाज्ञस्य कि
मेतन्मुनिसत्तम ॥ मं० ४२ ॥ अयं च निकृतः पुत्रैर्दा-
रैर्भृत्यैस्तथोज्झितः ॥ ३१॥ स्वजनेन च संत्यक्तस्तेषु
हार्दी तथाप्यति ॥ मं० ४३ ॥ एवमेष तथाहं चद्वाव
प्यत्यंतदुःखितौ ॥ ३२॥ दृष्टदोषेपि विषये ममत्वाकृ
ष्टमानसौ ॥ मं० ४४ ॥ तत्किमेतन्महाभाग यन्मोहो

स० ज्ञानिनोरपि ॥ ३३ ॥ ममास्य च भवत्येषाऽविवेकांधस्य
५३ मूढता ॥ मं० ४५ ॥ ऋषिरुवाच ॥ मं० ४६ ॥ ज्ञानम
स्ति समस्तस्य जंतोर्विषयगोचरे ॥ ३४ ॥ विषयश्च म
हाभाग याति चैवं पृथक्पृथक् ॥ मं० ४७ ॥ दिवांधाः प्रा
णिनः केचिद्रात्रावंधास्तथापरे ॥ ३५ ॥ केचिद्दिवा तथा
रात्रौ प्राणिनस्तुल्यदृष्टयः ॥ मं० ४८ ॥ ज्ञानिनो मनु
जाः सत्यं किं नु ते न हि केवलम् ॥ ३६ ॥ यतो हि ज्ञा
अ० निनः सर्वे पशुपक्षिमृगादयः ॥ मं० ४९ ॥ ज्ञानं च तन्म
१ नुष्याणां यत्तेषां मृगपक्षिणाम् ॥ ३७ ॥ मनुष्याणां च
यत्तेषां तुल्यमन्यत्तथोभयोः ॥ मं० ५० ॥ ज्ञानेपि सति

पश्यैतान्पतङ्गाञ्छावचंचुषु ॥ ३८ ॥ कणमोक्षादृता
न्मोहात्पीड्यमानानपि क्षुधा ॥ मं० ५१ ॥ मानुषा म
नुजव्याघ्र साभिलाषाः सुतान्प्रति ॥ ३९ ॥ लोभात्प्र
त्युपकाराय नन्वेतान्किं न पश्यसि ॥ मं० ५२ ॥ त
थापि ममतावर्ते मोहगर्ते निपातिताः ॥ ४० ॥ महा
मायाप्रभावेण संसारस्थितिकारिणा ॥ मं० ५३ ॥ त
न्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ॥ ४१ ॥
महामायाहरेश्चैषा तया संमोह्यते जगत् ॥ मं० ५४
॥ ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥ ४२ ॥
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥ मं० ५५

स० ॥ तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥ मं० ५६॥
५४ ४३॥ सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥ सावि
द्या परमामुक्तेर्हेतुभूता सनातनी ॥ मं० ५७॥ ४४॥
संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी ॥ मं० ५८॥ राजो
वाच ॥ मं० ५९॥ भगवन्का हि सा देवी महामायेति
यां भवान् ॥ मं० ६०॥ ४५॥ ब्रवीति कथमुत्पन्ना-
सा कर्मास्याश्च किं द्विज ॥ यत्प्रभावा च सा देवी य
अ० त्स्वरूपा यदुद्भवा ॥ मं० ६१॥ ४६॥ तत्सर्वं श्रोतुमि
१ च्छामि त्वत्तो ब्रह्मविदां वर॥ मं० ६२॥ ऋषिरुवाच
॥ मं० ६३॥ नित्यैव सा जगन्मूर्तिस्तया सर्वमिदंततम्

॥ मं० ६४ ॥ ४७ ॥ तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥

रा०
५५
देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥ मं० ६५ ॥
४८ ॥ उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ॥
योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥ मं० ६६ ॥
४९ ॥ आस्तीर्य शेषमभजत्कल्पांते भगवान्प्रभुः ॥ त
दा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥ मं० ६७ ॥
५० ॥ विष्णुकर्णमलोद्भूतौ हंतुं ब्रह्माणमुद्यतौ ॥ स
नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥ मं० ६८
अ०
॥ ५१ ॥ दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ॥
१
तुष्टाव योगनिद्रां तामेकाग्रहृदयः स्थितः ॥ मं० ६९
॥ ५२ ॥ विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ॥ वि

श्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥ मं० ७०
॥ ५३ ॥ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥
मं० ७१ ॥ ब्रह्मोवाच ॥ मं० ७२ ॥ त्वं स्वाहा त्वं स्व
धा त्वं हि वषट्कारः स्वरात्मिका ॥ मं० ७३ ॥ ५४ ॥
सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥ अ-
र्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः ॥ मं० ७४
॥ ५५ ॥ त्वमेव संध्या सावित्री त्वं देवि जननी परा ॥
त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥ मं० ७५
॥ ५६ ॥ त्वयैतत्पाल्यते देवि त्वमत्स्यंते च सर्वदा ॥
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥ मं० ७६

स० ॥५७॥ तथा संहृतिरूपान्ते जगतोस्य जगन्मये ॥
५६ महाविद्या महामाया महामेधा महास्मृतिः ॥ मं०७७
॥५८॥ महामोहा च भवती महादेवी महासुरी ॥प्र
कृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥ मं० ७८॥
५९ ॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥ त्वं
श्रीस्त्वमीश्वरी त्वंह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ मं०७९
॥६०॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरे
अ० व च ॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी त
१ था ॥ मं० ८०॥ ६१॥ शंखिनी चापिनी बाणभुशुंडी
परिघायुधा ॥ सौम्या सौम्यतराशेषसौम्येभ्यस्त्वति

सुंदरी ॥ मं० ८१॥ ६२॥ परा पराणां परमा त्वमेव
परमेश्वरी ॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिला-
त्मिके ॥ मं० ८२॥ ६३॥ तस्य सर्वस्य या शक्तिः सा त्वं
किं स्तूयसे तदा ॥ यया त्वया जगत्स्रष्टा जगत्पात्य-
त्ति यो जगत् ॥ मं० ८३॥ ६४ ॥ सोपि निद्रावशं नीतः
कस्त्वां स्तोतुमिहेश्वरः ॥ विष्णुः शरीरग्रहणमह मी
शान एव च ॥ मं० ८४॥ ६५॥ कारितास्ते यतोऽत-
स्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥ सा त्वमित्थं प्रभावैः
स्वैरुदारैर्देवि संस्तुता ॥ मं० ८५॥ ६६ ॥ मोहयैतौ दु-
राधर्षावसुरौ मधुकैटभौ ॥ प्रबोधं च जगत्स्वामी



बोधश्च क्रियतामस्य हंतुमेतौ महासुरौ ॥ मं० ८७ ॥
॥ ऋषिरुवाच ॥ मं० ८८ ॥ एवं स्तुता तदा देवी ताम-
सी तत्र वेधसा ॥ मं० ८९ ॥ ६८ ॥ विष्णोः प्रबोधनार्था-
य निहंतुं मधुकैटभौ ॥ नेत्रास्यनासिकाबाहुहृदयेभ्य-
स्तथोरसः ॥ मं० ९० ॥ ६९ ॥ निर्गम्य दर्शने तस्थौ ब्रह्म-
णोव्यक्तजन्मनः ॥ उत्तस्थौ च जगन्नाथस्तया मुक्तो
जनार्दनः ॥ मं० ९१ ॥ ७० ॥ एकार्णवे हि शयनात्ततः
स ददृशे च तौ ॥ मधुकैटभौ दुरात्मानावतिवीर्यपरा-
क्रमौ ॥ मं० ९२ ॥ ७१ ॥ क्रोधरक्तेक्षणावत्तुं ब्रह्माणं
जनितोद्यमौ ॥ समुत्थाय ततस्ताभ्यां युयुधे भगवान्हरिः

स०

५८

 पंचवर्षसहस्राणि बाहुप्रहरणो विभुः ॥



अ०

१

तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ॥ मं० ९४
॥ ७३॥ उक्तवंतौ वरोस्मत्तो व्रियतामिति केशवम् ॥
मं० ९५ ॥ भगवानुवाच ॥ मं० ९६ ॥ भवेतामद्य मे तुष्टौ
मम वध्यावुभावपि ॥ मं० ९७ ॥ ७४ ॥ किमन्येन वरे-
णात्र एतावद्धि वृतं मया ॥ मं० ९८ ॥ ऋषिरुवाच ॥
॥ मं० ९९ ॥ वंचिताभ्यामिति तदा सर्वमापोमयं जग-
त् ॥ मं० १०० ॥ ७५ ॥ विलोक्यताभ्यां गदितो भगवा-
न्कमलेक्षणः ॥ आवां जहि न यत्रोर्वी सलिलेन परि-
प्लुता ॥ मं० १०१ ॥ ७६ ॥ ॥ ऋषिरुवाच ॥ ॥
मं० १०२ ॥ तथेत्युक्त्वा भगवता शंखचक्रगदाभृता ॥

स०

५१

कृत्वाचक्रेण वै छिन्ने जघने शिरसी तयोः ॥ मं० १०३ ॥ ७७

अ०

१

एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ॥ प्रभाव-
मस्या देव्यास्तु भूयः शृणु वदामि ते ॥ मं०१०४॥७८
॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहा-
त्म्ये मधुकैटभवधो नाम प्रथमोऽध्यायः ॥ १ ॥ ॥

॥ श्लोकाः ॥ ७८॥

इति प्रथमोऽध्यायः।

अथदुर्गासप्तशती।

अध्यायः२

श्रीः ॥ [1]मध्यमे तु चरित्रेऽत्र मुनिर्विष्णुरुदाहृतः । उ-
ष्णिक्छन्दो महालक्ष्मीर्देवता बीजमद्रिजा ॥ वायुस्त-
त्त्वं धनप्राप्त्यै विनियोग उदाहृतः ॥ ॐ अक्षस्रक्पर-
शुं गदेषुकुलिशं पद्मं धनुः कुंडिकां दंडं शक्तिमसिंच
चर्म जलजं घंटां सुराभाजनम् ॥ शूलं पाश सुदर्श-
ने च दधतीं हस्तैः प्रसन्नाननां सेवे सैरिभमर्दिनीमिह

---

१ मध्यमचरित्रस्य ॥ विष्णुर्ऋषिः ॥ महालक्ष्मीर्देवता ॥ उष्णि-
क्छंदः ॥ शाकंभरी शक्तिः । दुर्गा बीजम् ॥ वायुस्तत्त्वम् । यजु-
र्वेदः स्वरूपम् ॥ महालक्ष्मी प्रीत्यर्थं मध्यमचरित्रजपे विनियोगः॥

सं०
६२

अ०
२

देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ॥ १२५



स॰ महिषे सुराणामधिपे देवानां च पुरंदरे ॥ मं॰ १०६॥ १॥
६३ तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ॥ जित्वा च स-
कलान्देवानिंद्रो भून्महिषासुरः ॥ मं॰ १०७ ॥ २॥ ततः
पराजिता देवाः पद्मयोनिं प्रजापतिम् ॥ पुरस्कृत्यग-
तास्तत्र यत्रेशगरुडध्वजौ ॥ मं॰ १०८ ॥ ३॥ यथावृत्तं
तयोस्तद्वन्महिषासुरचेष्टितम् ॥ त्रिदशाः कथयामा-
सुर्देवाभिभवविस्तरम् ॥ मं॰ १०९ ॥ ४ ॥ सूर्येंद्राग्न्य-
अ॰ निलेंदूनां यमस्य वरुणस्य च ॥ अन्येषां चाधिकारा-
२ न्सस्वयमेवाधितिष्ठति ॥ मं॰ ११० ॥ ५ ॥ स्वर्गान्निरा-
कृताः सर्वे तेन देवगणा भुवि ॥ विचरंति यथा मर्त्या

महिषेण दुरात्मना ॥ मं० १११ ॥ ६ ॥ एतद्वः कथितंसर्व



स० ममरारिविचेष्टितम् ॥ शरणं वः प्रपन्नाःस्मो वधस्तस्य
६४ विचिंत्यताम् ॥ मं० ११२॥ ७ ॥ इत्थं निशम्य देवानां व-
चांसि मधुसूदनः ॥ चकार कोपं शंभुश्च भ्रुकुटीकुटिला-
ननौ ॥ मं० ११३॥ ८ ॥ ततोतिकोपपूर्णस्य चक्रिणोव-
दनात्ततः ॥ निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य
च ॥ मं० ११४ ॥ ९॥ अन्येषां चैव देवानां शक्रादी-
नां शरीरतः ॥ निर्गतंसुमहत्तेजस्तच्चैक्यं समगच्छत
अ० ॥ मं० ११५॥ १०॥ अतीव तेजसः कूटं ज्वलंतमिव पर्व
२ तम् ॥ ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरम् ॥ मं०
११६॥११॥ अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ॥

एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥मं॰११७॥१२

स॰ ॥ यदभूच्छांभवं तेजस्तेनाजायत तन्मुखम् ॥ याम्येन
६५ चाभवन्केशा बाहवो विष्णुतेजसा ॥ मं॰ ११८॥ १३ ॥
सौम्येन स्तनयोर्युग्मं मध्यं चैंद्रेण चाभवत् ॥ वारुणेन
च जंघोरू नितंबस्तेजसा भुवः ॥ मं॰ ११९॥ १४॥ ब्रह्म
णस्तेजसा पादौ तदंगुल्योर्कतेजसा ॥ वसूनां च करां-
गुल्यः कौबेरेण च नासिका ॥ मं॰ १२०॥ १५ ॥ तस्या-
स्तु दंताः संभूताः प्राजापत्येन तेजसा ॥ नयनत्रितयं
अ॰ जज्ञे तथा पावकतेजसा ॥ मं॰ १२१॥ १६॥ भ्रुवौ च सं
२ ध्ययोस्तेजः श्रवणावनिलस्य च ॥ अन्येषां चैव देवा
नां संभवस्तेजसां शिवा ॥ मं॰ १२२॥ १७॥ ततस्समस्त

देवानां तेजोराशिसमुद्भवाम् ॥ तां विलोक्य मुदं प्रापु-
रमरा महिषार्दिताः ॥ मं० १२३ ॥ १८ ॥ शूलं शूलाद्वि-
निष्कृष्य ददौ तस्यै पिनाकधृक् ॥ चक्रं च दत्तवान्कृ-
ष्णः समुत्पाद्य स्वचक्रतः ॥ मं० १२४ ॥ १९ ॥ शंखं च
वरुणः शक्तिं ददौ तस्यै हुताशनः ॥ मारुतो दत्तवां-
श्चापं बाणपूर्णे तथेषुधी ॥ मं० १२५ ॥ २० ॥ वज्रमिंद्रः
समुत्पाद्य कुलिशादमराधिपः ॥ ददौ तस्यै सहस्राक्षो
घंटामैरावताद्गजात् ॥ मं० १२६ ॥ २१ ॥ कालदंडाद्यमो
दण्डं पाशं चांबुपतिर्ददौ ॥ प्रजापतिश्चाक्षमालां ददौ
ब्रह्मा कमंडलुम् ॥ मं० १२७ ॥ २२ ॥ समस्तरोमकूपे-

स० षु निजरश्मीन्दिवाकरः ॥ कालश्च दत्तवान्खड्गं तस्या-
६६ श्चर्म च निर्मलम् ॥ मं० १२८ ॥ २३ ॥ क्षीरोदश्चामलं
हारमजरे च तथांबरे ॥ चूडामणिं तथा दिव्यं कुंडलेक-
टकानि च ॥ मं० १२९ ॥ २४ ॥ अर्धचन्द्रं तथा शुभ्रं के
यूरान्सर्वबाहुषु ॥ नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्त
मम् ॥ मं० १३० ॥ २५ ॥ अंगुलीयकरत्नानि समस्तास्वं-
गुलीषु च ॥ विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मल-
अ० म् ॥ मं० १३१ ॥ २६ ॥ अस्त्राण्यनेकरूपाणि तथाभे-
२ द्यं च दंशनम् ॥ अम्लान पंकजां मालां शिरस्युरसि चा-
पराम् ॥ मं० १३२ ॥ २७ ॥ अददज्जलधिस्तस्यै पंकजं

चातिशोभनम् ॥ हिमवान्वाहनं सिंहं रत्नानि विवि-
धानि च ॥ मं० १३३ ॥ २८॥ ददावशून्यं सुरया पानपा-
त्रं धनाधिपः ॥ शेषश्च सर्वनागेशो महामणिविभूषित-
म् ॥ मं० १३४ ॥ २९ ॥ नागहारं ददौ तस्यै धत्ते यः पृ-
थिवीमिमाम् ॥ अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा-
॥ मं० १३५ ॥ ३०॥ सम्मानिता ननादोच्चैः साट्टहासं मु
हुर्मुहुः ॥ तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥
मं० १३६ ॥ ३१ ॥ अमायतातिमहता प्रतिशब्दो महा-
नभूत् ॥ चुक्षुभुः सकलालोकास्समुद्राश्च चकंपिरे ॥
मं० १३७ ॥ ३२॥ चचाल वसुधा चेलुः सकलाश्च मही-

स० धराः ॥ जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम् ॥
६७ मं० १३८ ॥ ३३ ॥ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्त-
यः ॥ दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥ मं०
॥ १३९ ॥ ३४ ॥ सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदा-
युधाः ॥ आः किमेतदिति क्रोधादाभाष्य महिषासुरः
॥ मं० १४० ॥ ३५ ॥ अभ्यधावत तं शब्दमशेषैरसुरैर्वृ-
तः ॥ स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥ मं०
अ० १४१ ॥ ३६ ॥ पादाक्रांत्या नतभुवं किरीटोल्लिखितांबरा-
२ म् ॥ क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥
मं० १४२ ॥ ३७ ॥ दिशो भुजसहस्रेण समंताद्व्याप्य सं

स्थिताम् ॥ ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥
मं० १४३॥ ३८॥ शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्त-
रम् ॥ महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ मं०
१४४ ॥ ३९ ॥ युयुधे चामरश्चान्यैश्चतुरंगबलान्वितः॥
रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥ मं० १४५॥
४०॥ अयुध्यतायुतानां च सहस्रेण महाहनुः ॥ पञ्चाश-
द्भिश्च नियुतैरसिलोमा महासुरः ॥ मं० १४६ ॥ ४१ ॥अ-
युतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ॥ गजवाजि-
सहस्रौघैरनेकैः परिवारितः ॥ मं० १४७ ॥ ४२॥ वृतो
रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ॥ बिडालाख्यो

युतानां च पंचाशद्भिरथायुतैः ॥ मं १४८ ॥ ४३॥ यु-
युधे संयुगे तत्र रथानां परिवारितः ॥ अन्ये च तत्रा-
युतशो रथनागहयैर्वृताः ॥ मं॰ १४९ ॥ ४४ ॥ युयुधु-
स्संयुगे देव्या सह तत्र महासुराः ॥ कोटिकोटिसहस्रै-
स्तु रथानां दन्तिनां तथा ॥ मं॰ १५० ॥ ४५ ॥ ह-
यानां च वृतो युद्धे तत्राभून्महिषासुरः ॥ तोमरैर्भिं-
दिपालैश्च शक्तिभिर्मुसलैस्तथा ॥ मं॰ १५१ ॥ ४६ ॥
युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ॥ केचिच्च-
चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥ मं॰ १५२ ॥
४७ ॥ देवीं खड्गप्रहारैस्तु ते तां हंतुं प्रचक्रमुः ॥ सा-

पि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥
मं० १५३ ॥ ४८ ॥ लीलयैव प्रचिच्छेद निजश-
स्त्रास्त्रवर्षिणी ॥ अनायस्तानना देवी स्तूयमानासु-
रर्षिभिः ॥ मं० १५४ ॥ ४९ ॥ मुमोचासुरदेहेषुश-
स्त्राण्यस्त्राणि चेश्वरी ॥ सोपि क्रुद्धो धुतसटो देव्या
वाहनकेसरी ॥ मं० १५५ ॥ ५० ॥ चचारासुरसैन्येषु
वनेष्विव हुताशनः ॥ निःश्वासान्मुमुचे यांश्च युध्य-
माना रणेम्बिका ॥ मं० १५६ ॥ ५१ ॥ त एव सद्यः
संभूता गणाः शतसहस्रशः ॥ युयुधुस्ते परशुभि-
र्भिंदिपालासिपट्टिशैः ॥ मं० १५७ ॥ ५२ ॥

स०
६९

नाशयंतोऽसुरगणान्देवीशक्त्युपबृंहिताः॥

अ०
२

अवादयंत पटहान्गणाः शंखांस्तथापरे ॥ मं० १५८ ॥ ५३
॥ मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ॥ ततो देवी
त्रिशूलेन गदया शक्तिवृष्टिभिः ॥ मं० १५९ ॥ ५४ ॥
खड्गादिभिश्च शतशो निजघान महासुरान् ॥ पातया-
मास चैवान्यान्घण्टास्वनविमोहितान् ॥ मं० १६० ॥ ५५
॥ असुरान्भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ॥ केचि-
द्द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥ मं० १६१ ॥ ५६
विपोथिता निपातेन गदया भुवि शेरते ॥ वेमुश्च केचि-
द्रुधिरं मुसलेन भृशं हताः ॥ मं० १६२ ॥ ५७ ॥ केचिन्नि-
पतिता भूमौ भिन्नाः शूलेन वक्षसि ॥ निरन्तराः शरौघे-

स० ण कृताः केचिद्रणाजिरे ॥ मं० १६३ ॥ ५८ ॥ सेनानुका-
७० रिणः प्राणान्मुमुचुस्त्रिदशार्दनाः ॥ केषांचिद्बाहवश्छि-
न्नाश्छिन्नग्रीवास्तथापरे ॥ मं० १६४ ॥ ५९ ॥ शिरांसि
पेतुरन्येषामन्ये मध्ये विदारिताः ॥ विच्छिन्नजंघास्त्व-
परे पेतुरुर्व्यां महासुराः ॥ मं० १६५ ॥ ६० ॥ एकबाह्वक्षि
चरणाः केचिद्देव्या द्विधा कृताः ॥ छिन्नेपि चान्ये शि-
रासि पतिताः पुनरुत्थिताः ॥ मं० १६६ ॥ ६१ ॥ कबंधा
अ० युयुधुर्देव्या गृहीतपरमायुधाः ॥ ननृतुश्चापरे तत्र यु-
२ द्धे तूर्यलयाश्रिताः ॥ मं० १६७ ॥ ६२ ॥ कबंधाश्छिन्न-
शिरसः खड्गशक्त्यृष्टिपाणयः ॥ तिष्ठतिष्ठेति भाषंतो

देवीमन्ये महासुराः ॥ मं० १६८ ॥ ६३ ॥ पातितै र-
थनागाश्वैरसुरैश्च वसुंधरा ॥ अगम्या साभवत्तत्र
यत्राभूत्समहारणः ॥ मं० १६९ ॥ ६४ ॥ शोणि-
तौघा महानद्यस्सद्यस्तत्र विसुस्रुवुः ॥ मध्ये चा
सुरसैन्यस्य वारणासुरवाजिनाम् ॥ मं० १७० ॥
॥ ६५ ॥ क्षणेन तन्महासैन्यमसुराणां तथाम्बि-
का ॥ निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम्
॥ मं० १७१ ॥ ६६ ॥ स च सिंहो महानादमुत्सृज-
न्धुतकेसरः ॥ शरीरेभ्योऽमरारीणामसूनिव विचिन्वति

स०

७१

॥मं० १७२॥ ६७॥ देव्या गणेश्च तैस्तत्र कृतं युद्धं तथासुरैः॥

अ०

२

यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ मं० १७३॥
६८॥ ॥ इति मार्कण्डेयपुराणे सावर्णिकेमन्वंतरे
देवीमाहात्म्ये महिषासुरसैन्यवधो नाम द्वितीयोऽध्याय
॥ २॥ ॥ श्लोकाः ६८ ॥ एवमादितः १४६ ॥ ॥

इतिद्वितीयोऽध्यायः।

अथ दुर्गासप्तशती।

अध्यायः ३

॥ ऋषिरुवाच ॥ मं० १७४ ॥ निहन्यमानं तत्सैन्यम-
वलोक्य महासुरः ॥ सेनानीश्चिक्षुरः कोपाद्ययौ योद्धु
मथांबिकाम् ॥ मं० १७५ ॥ १ ॥ स देवीं शरवर्षेण वव
र्ष समरेऽसुरः ॥ यथा मेरुगिरेः शृंगं तोयवर्षेण तोय
दः ॥ मं० १७६ ॥ २ ॥ तस्यच्छित्त्वा ततो देवी लीलयै
व शरोत्करान् ॥ जघान तुरगान्बाणैर्यंतारं चैव वा-
जिनाम् ॥ मं० १७७ ॥ ३ ॥ चिच्छेद च धनुः सद्यो ध्व
जं चातिसमुच्छ्रितम् ॥ विव्याध चैव गात्रेषुच्छिन्नध
न्वानमाशुगैः ॥ मं० १७८ ॥ ४ ॥ सच्छिन्नधन्वा वि-
रथो हताश्वो हतसारथिः ॥ अभ्यधावत तां देवीं ख

स० ङ्गचर्मधरोऽसुरः ॥ मं० १७९ ॥ ५ ॥ सिंहमाहत्य खड्गेन
७४ तीक्ष्णधारेण मूर्धनि ॥ आजघान भुजे सव्ये देवीम
प्यतिवेगवान् ॥ मं० १८० ॥ ६ ॥ तस्याः खड्गो भुजं प्रा
प्य पफाल नृपनन्दन ॥ ततो जग्राह शूलं स कोपा
दरुणलोचनः ॥ मं० १८१ ॥ ७ ॥ चिक्षेप च ततस्त
त्तु भद्रकाल्यां महासुरः ॥ जाज्वल्यमानं तेजोभीर
विबिंबमिवांबरात् ॥ मं० १८२ ॥ ८ ॥ दृष्ट्वा तदाप
अ० तच्छूलं देवीशूलममुञ्चत ॥ तच्छूलं शतधा तेन
३ नीतं स च महासुरः ॥ मं० १८३ ॥ ९ ॥ हते तस्मि
न्महावीर्ये महिषस्य चमूपतौ ॥ आजगाम गजारू

ढश्चामरास्त्रिदशार्दनः ॥ मं० १८४ ॥ १०॥ सोऽपि श
क्तिं मुमोचाथ देव्यास्तामंबिका द्रुतम् ॥ हुंकाराभि
हतां भूमौ पातयामास निष्प्रभाम् ॥ मं० १८५॥११
॥ भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ॥ चि
क्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥ मं०१८६
॥ १२ ॥ ततः सिंहः समुत्पत्य गजकुंभांतर स्थितः॥
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ मं० १८७
॥१३॥ युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं ग
तौ ॥ युयुधातेति संरब्धौ प्रहारैरतिदारुणैः ॥मं० १८८
॥१४॥ ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा ॥

स० ७५ करप्रहारेण शिरश्चामरस्य पृथक्कृतम् ॥ मं० १८९ ॥

अ० ३

॥१५॥ उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः॥ दं
तमुष्टितलैश्चैव करालश्च निपातितः ॥ मं०१९०॥१६
॥देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ॥ बा-
ष्कलं भिंदिपालेन बाणैस्ताम्रं तथांधकम् ॥ मं०१९१
॥१७॥ उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् ॥
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥ मं०१९२॥
१८॥ बिडालस्यासिना कायात्पातयामास वै शिरः॥
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ॥मं०१९३
॥१९॥ एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः॥
माहिषेण स्वरूपेण त्रासयामास तान्गणान् ॥ मं०

स० ७९ १९४॥ २०॥ कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथा
परान्॥ लांगूलताडितांश्चान्याञ्छृंगाभ्यां च वि
दारितान्॥ मं० १९५॥ २१॥ वेगेन कांश्चिदपरान्ना
देन भ्रमणेन च॥ निःश्वासपवनेनान्यान्पातयामास
भूतले॥ मं० १९६॥ २२॥ निपात्य प्रमथानीकमभ्यधा
वत सोऽसुरः॥ सिंहं हंतुं महादेव्याः कोपं चक्रे त
तोम्बिका॥ मं० १९७॥ २३॥ सोपि कोपान्महावी
अ० ३ र्यः खुरक्षुण्णमहीतलः॥ शृंगाभ्यां पर्वतानुच्चांश्चि
क्षेप च ननाद च॥ मं० १९८॥ २४॥

वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ॥

स० लांगूलेनाहतश्चाब्धिः
७७ प्लावयामास सर्वतः ॥
मं०१९९॥२५॥ धुतशृं
गविभिन्नाश्च खंडखं
डं ययुर्घनाः॥श्वासानि
लास्ताः शतशो निपेतुर्न
भसोऽचलाः॥ मं०२००
अ० ॥२६॥ इतिक्रोधसमा
३ ध्मातमापतंतं महासु
रम्॥ दृष्ट्वा सा चंडिका

कोपं तदु्धाय तदाकरो
त्॥मं०२०१॥२७॥ सा
क्षिप्त्वा तस्य वै पाशं तं
बबंध महासुरम्॥तत्या
जमाहिषं रूपं सोपि ब
द्धो महामृधे॥मं०२०२॥
२८॥ ततः सिंहोऽभव
त्सद्यो यावत्तस्यांबिका
शिरः॥छिनत्ति तावत्पु
रुषः खड्गपाणिरदृश्यत

स० ॥मं० २०३ ॥२९॥ तत एवाशु पुरुषं देवी चिच्छेद सायकैः॥

७८



अ०

३

तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ॥ मं० २०४
॥३०॥ करेण च महासिंहं तं चकर्ष जगर्ज च ॥ कर्ष
तस्तु करं देवी खड्गेन निरकृंतत ॥ मं० २०५ ॥ ३१ ॥ त
तो महासुरो भूयो माहिषं वपुरास्थितः ॥ तथैव क्षो
भयामास त्रैलोक्यं सचराचरम् ॥ मं० २०६ ॥ ३२ ॥ त
तः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ॥ पपौ
पुनः पुनश्चैव जहासारुणलोचना ॥ मं० २०७ ॥ ३३ ॥
ननर्द चासुरः सोपि बलवीर्यमदोद्धतः ॥ विषाणाभ्यां
च चिक्षेप चंडिकां प्रति भूधरान् ॥ मं० २०८ ॥ ३४
॥ सा च तान्प्रहितांस्तेन चूर्णयंती शरोत्करैः ॥

स० उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥ मं० २०९ ॥ ३५ ॥ देव्युवाच ॥

७९

अ०

३

मं०२१०॥ गर्जगर्जक्ष
णं मूढ मधु यावत्पिबा
म्यहम् ॥ माया त्वयि
हतेत्रैव गर्जिष्यंत्याशु
देवताः॥ मं०२११॥ ३६
॥ऋषिरुवाच ॥ मं०
२१२ ॥ एवमुक्त्वा समु
त्पत्य सा रूढा तं महा
सुरम् ॥ पादेनाक्रम्य
कंठे च शूलेनैनमताडयत्

स० डयत् ॥ मं०२१३॥ ३७॥ ततः सोपि पदाक्रांतस्तया निज
८० मुखात्ततः॥ अर्धनिष्क्रान्त एवासीद्देव्या वीर्येण संवृतः॥
॥मं०२१४॥३८॥ अर्धनिष्क्रांत एवासौ युध्यमानो महासु
रः॥ तया महासिना देव्या शिरश्छित्त्वा निपातितः॥मं०
२१५॥३९॥ ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत्॥
प्रहर्षं च परं जग्मुः सकला देवतागणाः॥मं०२१६॥४०॥
तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः॥ जगुर्गंधर्वप
अ० तयो ननृतुश्चाप्सरोगणाः॥ मं०२१७॥४१॥ इति
३ मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासु
रवधो नाम तृतीयोऽध्यायः॥३॥ श्लोकाः॥४१॥ एवमा०१८७

अथदुर्गासप्तशती ।

अध्यायः ४

श्रीगणेशाय नमः ॥ ऋषिरुवाच ॥ मं० २१८ ॥ शक्रादयः

स० सुरगणा निहतेतिवीर्ये तस्मिन्दुरात्मनि सुरारिबलेव
८२. देव्या ॥ तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्र
हर्षपुलकोद्गमचारुदेहाः ॥ मं०२१९ ॥ १ ॥ देव्या य-
या ततमिद् जगदात्मशक्त्या निश्शेषदेवगणशक्ति
समूहमूर्त्या ॥ तामंबिकामखिलदेवमहर्षिपूज्यां भ
क्त्या नताः स्म विदधातु शुभानि सा नः ॥ मं० २२०
॥ २ ॥ यस्याः प्रभावमतुलं भगवाननंतो ब्रह्मा हर-
अ० श्च न हि वक्तुमलं बलं च ॥ सा चण्डिकाखिलजग
४ त्परिपालनाय नाशाय चाशुभभयस्य मतिं करोतु ॥
मं०२२१ ॥ ३ ॥ या श्रीः स्वयं सुकृतिनां भवनष्वल-

क्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥ श्रद्धा स
तां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपाल
य देवि विश्वम् ॥ मं० २२२॥ ४ ॥ किं वर्णयाम तवरू
पमचिंत्यमेतत्किं चातिवीर्यमसुरक्षयकारि भूरि ॥ किं
चाहवेषु चरितानि तवाति यानि सर्वेषु देव्यसुरदेवग
णादिकेषु ॥ मं० २२३ ॥ ५ ॥ हेतुः समस्तजगतां त्रिगु
णापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा ॥ सर्वाश्र
याखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृति
स्त्वमाद्या ॥ मं० २२४ ॥ ६ ॥ यस्याः समस्तसुरता समु
दीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि ॥ स्वाहासि

स० वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्व
८३ धा च ॥ मं० २२५ ॥ ७ ॥ या मुक्तिहेतुरविचिंत्यमहाव्र
ता त्वमभ्यस्यसे सुनियतेंद्रियतत्त्वसारैः ॥ मोक्षार्थिभि
र्मुनिभिरस्तसमस्तदोषैर्विद्याऽसि सा भगवती परमा हि
देवि ॥ मं० २२६ ॥ ८ ॥ शब्दात्मिका सुविमलर्ग्यजुषां
निधानमुद्गीथरम्यपदपाठवतां च साम्नाम् ॥ देवि त्र-
यी भगवती भवभावनाय वार्ता च सर्वजगतां परमा-
अ० र्तिहंत्री ॥ मं० २२७ ॥ ९ ॥ मेधासि देवि विदिताखिल
४ शास्त्रसारा दुर्गाऽसि दुर्गभवसागरनौरसंगा ॥ श्रीः कै
टभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलि

कृतप्रतिष्ठा ॥ मं० २२८ ॥ १० ॥ ईषत्सहासममलं परि
पूर्णचंद्रबिम्बानुकारि कनकोत्तमकांतिकांतम् ॥ अ
त्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा
महिषासुरेण ॥ मं० २२९ ॥ ११ ॥ दृष्ट्वा तु देवि कुपितं
भ्रुकुटीकरालमुद्यच्छशांकसदृशच्छवि यन्न सद्यः ॥
प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपि
तांतकदर्शनेन ॥ मं० २३० ॥ १२ ॥ देवि प्रसीद परमा
भवती भवाय सद्यो विनाशयसि कोपवती कुलानि ॥
विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महि
षासुरस्य ॥ मं० २३१ ॥ १३ ॥ ते संमता जनपदेषु धना

स० नि तेषां तेषां यशांसि न च सीदति धर्मवर्गः ॥ धन्यास्त
८४ एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्र
सन्ना ॥ मं० २३२ ॥ १४ ॥ धर्म्याणि देवि सकलानि स
दैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥ स्वर्गं
प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेपि फलदा ननु
देवि तेन ॥ मं० २३३ ॥ १५ ॥ दुर्गे स्मृता हरसि भीति
मशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥
अ० दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकर-
४ णाय सदार्द्रचित्ता ॥ मं० २३४ ॥ १६ ॥ एभिर्हतैर्जग
दुपैति सुखं तथैते कुर्वंतु नाम नरकाय चिराय पापम्

॥ संग्राममृत्युमधिगम्य दिवं प्रयांतु मत्वेति नूनमहि
तान्विनिहंसि देवि ॥ मं० २३५ ॥ १७॥ दृष्ट्वैव किं नभ
वती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि श
स्त्रम् ॥ लोकान्प्रयान्तु रिपवोपि हि शस्त्रपूता इत्थं म
तिर्भवति तेष्वहितेषु साध्वी ॥ मं० २३६ ॥ १८॥ खड्ग
प्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकांतिनिवहेन
दृशो ऽसुराणाम् ॥ यन्नागता विलयमंशुमदिंदुखंड
योग्याननं तव विलोकयतां तदेतत् ॥ मं० २३७ ॥१९
॥ दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिं
त्यमतुल्यमन्यैः वीर्यं च हंतृ हृतदेवपराक्रमाणा वै

स० रिष्वपि प्रकटितैव दया त्वयेत्थम् ॥ मं० २३८॥ २० ॥
८५ केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभय
कार्यतिहारि कुत्र ॥ चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेपि ॥ मं० २३९॥ २१ ॥ त्रै
लोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्ध
नि तेपि हत्वा ॥ नीता दिवं रिपुगणा भयमप्यपास्तम
स्माकमुन्मदसुरारिभवं नमस्ते ॥ मं० २४० ॥ २२॥ शूले
अ० न पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घण्टास्वने
४ न नः पाहि चापज्यानिः स्वनेन च ॥ मं० २४१ ॥ २३
॥ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥ भ्रा

मणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ मं० २४२ ॥२४
॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ॥ या
नि चात्यर्थघोराणि तैरक्षास्मांस्तथाभुवम् ॥ मं० २४३
॥२५॥ खड्गशूलगदादीनि यानि चास्त्राणि तेम्बिके॥
करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ॥ मं० २४४ ॥२६
॥ ॥ ऋषिरुवाच ॥ मं० २४५ ॥ एवं स्तुता सुरैर्दि-
व्यैः कुसुमैर्नंदनोद्भवैः॥ अर्चिता जगतां धात्री तत्र गं
धानुलेपनैः॥ मं० २४६ ॥ २७ ॥ भक्त्या समस्तैस्त्रि
दशैर्दिव्यैर्धूपैः सुधूपिता ॥ प्राह प्रसादसुमुखी सम
स्तान्प्रणतान्सुरान् ॥ मं० २४७ ॥ २८॥ देव्युवाच ॥

स०

८६

मं०२४८॥ व्रियतां त्रिदशाः सर्वे यदस्मत्तोभिवांछितम्

अ०

४

मं॰ २४९ ॥ देवा ऊचुः ॥ मं॰ २५० ॥ भगवत्या कृतं
सर्वं न किंचिदवशिष्यते ॥ २९ ॥ यदयं निहतः श
त्रुरस्माकं महिषासुरः ॥ मं॰ २५१ ॥ यदि चापि व
रो देयस्त्वयास्माकं महेश्वरि ॥ ३० ॥ संस्मृता संस्मृ
ता त्वं नो हिंसेथाः परमापदः ॥ मं॰ २५२ ॥ यश्च
मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥ ३१ ॥ त
स्य वित्तर्द्धिविभवैर्धनदारादिसंपदाम् ॥ मं॰ २५३ ॥
वृद्धयेस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥ मं॰
२५४ ॥ ३२ ॥ ऋषिरुवाच ॥ मं॰ २५५ ॥ इति
प्रसादिता देवैर्जगतोर्थे तथात्मनः ॥ तथेत्युक्त्वा

स० भद्रकाली बभूवांतर्हिता नृप ॥ मं० २५६ ॥ ३३ ॥
८७ इत्येतत्कथितं भूप संभूता सा यथा पुरा ॥ देवी
देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ मं० २५७ ॥
३४ ॥ पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् ॥
वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः ॥ मं०
२५८ ॥ ३५ ॥ रक्षणाय च लोकानां देवानामुप
कारिणी ॥ तच्छृणुष्व मयाख्यातं यथावत्कथ
अ० यामिते ॥ मं० २५९ ॥ ३६ ॥ ॥ इति श्री
४ मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये

शक्रादिस्तुतिर्नाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥
श्लोकाः ३६ ॥ एवमादितः २२३ ॥ श्री ॥

अथदुर्गासप्तशती।

अध्यायः ५

श्रीगणेशाय नमः॥
उत्तरस्य चरित्रस्य
ऋषिः शंकर ईरितः
। त्रिष्टुप्छन्दो देवता
ऽत्र महापूर्वा सरस्व
ती॥ कामो बीजं रवि
स्तत्त्वं कामास्त्यै वि-
नियोजनम् ॥ अथ
ध्यानम्॥ घण्टाशूल

१उत्तरचरित्रस्य रुद्रऋषिः॥ महासरस्वती देवता॥ अनुष्टुप्छंदः॥ भीमाशक्तिः॥ भ्रामरी बीज-
म्॥ सूर्यस्तत्त्वम्॥ सामवेदःस्वरूपम्॥ महासरस्वतीप्रीत्यर्थमुत्तरचरित्रजपे विनियोगः॥

स० हलानि शंखमुसले चक्रं धनुः सायकं हस्ताब्जैर्दध-
१० तीं घनांतविलसच्छीतांशुतुल्यप्रभाम् ॥ गौरीदेहस-
मुद्भवां त्रिनयनामाधारभूतां महापूर्वामत्र सरस्वती-
मनुभजे शुंभादिदैत्यार्दिनीम् ॥१॥ ऋषिरुवाच ॥ मं०
२६० ॥ पुरा शुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः ॥
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥ मं०
२६१ ॥ १ ॥ तावेव सूर्यतां तद्वदधिकारं तथैंदवम् ॥
अ० कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ मं० २६२
५ ॥ २ ॥ तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ॥ ततो
देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥ मं० २६३ ॥

॥ ३ ॥ त्हताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः
॥ महासुराभ्यां तां देवीं संस्मरंत्यपराजिताम् ॥ मं०
२६४ ॥ ४ ॥ तयास्माकं वरो दत्तो यथापत्सु स्मृता-
खिलाः ॥ भवतां नाशयिष्यामि तत्क्षणात्परमापदः
॥ मं० २६५ ॥ ५ ॥ इति कृत्वा मतिं देवा हिमवंतं न
गेश्वरम् ॥ जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टु
वुः ॥ मं० २६६ ॥ ६ ॥ देवाऊचुः ॥ मं० २६७ ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ नमः प्र-
कृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ मं०२६८॥

स० ११ ॥७॥ रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः ॥



अ० ५

ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं नमः ॥ मं० २६९ ॥८ ॥ कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः ॥ नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ मं० २७० ॥ ९ ॥ दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥ ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ मं० २७१ ॥ १० ॥ अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ॥ नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ मं० २७२ ॥ ११ ॥ या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥ नमस्तस्यै ॥ मं० २७३ ॥ नमस्तस्यै ॥ मं० २७४ ॥ नमस्तस्यै नमो नमः ॥ मं० २७५

स० ॥१२॥ या देवी सर्वभूतेषु चेतनेत्यभिधीयते ॥ नमस्त
१२. स्यै ॥ मं० २७६ ॥ नमस्तस्यै ॥ मं० २७७ ॥ नमस्त-
स्यै नमोनमः ॥ मं० २७८ ॥ १३ ॥ या देवी सर्वभूतेषु
बुद्धिरूपेण संस्थिता ॥ नमस्तस्यै ॥ मं० २७९ ॥ न-
मस्तस्यै ॥ मं० २८० ॥ नमस्तस्यै नमोनमः ॥ मं०
२८१ ॥ १४ ॥ या देवी सर्वभूतेषु निद्रारूपेण संस्थिता
॥ नमस्तस्यै ॥ मं० २८२ ॥ नमस्तस्यै ॥ मं० २८३ ॥
अ० नमस्तस्यै नमोनमः ॥ मं० २८४ ॥ १५ ॥ या देवी
५ सर्वभूतेषु क्षुधारूपेण संस्थिता ॥ नमस्तस्यै ॥ मं०
२८५ ॥ नमस्तस्यै ॥ मं० २८६ ॥ नमस्तस्यै नमोन-

मः ॥ २८७ ॥ १६ ॥ या देवी सर्वभूतेषु च्छायारूपे-
ण संस्थिता ॥ नमस्तस्यै ॥ मं० २८८ ॥ नमस्तस्यै
॥ मं० २८९ ॥ नमस्तस्यै नमोनमः ॥ मं० २९०॥१७
॥ या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥ नम-
स्तस्यै ॥ मं० २९१ ॥ नमस्तस्यै ॥ मं० २९२ ॥ न-
मस्तस्यै नमोनमः ॥ मं० २९३ ॥ १८ ॥ या देवीस-
र्वभूतेषु तृष्णारूपेण संस्थिता ॥ नमस्तस्यै ॥
मं० २९४ ॥ नमस्तस्यै ॥ मं० २९५ ॥ नमस्तस्यै न-
मोनमः ॥ मं० २९६ ॥ १९ ॥ या देवी सर्वभूतेषुक्षां
तिरूपेण संस्थिता ॥ नमस्तस्यै ॥ मं० २९७ ॥ न

स॰ मस्तस्यै ॥ मं॰ २९८ ॥ नमस्तस्यै नमो नमः ॥ मं॰
१३ २९९ ॥ २०॥ या देवी सर्वभूतेषु जातिरूपेण संस्थि
ता ॥ नमस्तस्यै ॥ मं॰ ३०० ॥ नमस्तस्यै ॥ मं॰
३०१ ॥ नमस्तस्यै नमो नमः ॥ मं॰ ३०२॥ २१ ॥
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥ नमस्त
स्यै ॥ मं॰ ३०३ ॥ नमस्तस्यै ॥ मं॰ ३०४ ॥ नमस्त-
स्यै नमो नमः ॥ मं॰ ३०५ ॥ २२ ॥ या देवी सर्वभूते-
अ॰ षु शांतिरूपेण संस्थिता ॥ नमस्तस्यै ॥ मं॰ ३०६॥
५ नमस्तस्यै ॥ मं॰ ३०७ नमस्तस्यै नमोनमः ॥ मं॰
३०८ ॥ २३ ॥ या देवी सर्वभूतेषु श्रद्धारूपेण सं-

स्थिता ॥ नमस्तस्यै ॥ मं० ३०९ ॥ नमस्तस्यै ॥ मं० ३१० ॥ नमस्तस्यै नमोनमः ॥ मं० ३११ ॥ २४ ॥ या देवी सर्वभूतेषु कांतिरूपेण संस्थिता ॥ नमस्तस्यै॥ मं० ३१२ ॥ नमस्तस्यै ॥ मं० ३१३ ॥ नमस्तस्यै नमोनमः ॥ मं० ३१४ ॥ २५ ॥ या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ॥ नमस्तस्यै ॥ मं० ३१५ ॥ नमस्तस्यै ॥ मं० ३१६ ॥ नमस्तस्यै नमोनमः ॥ मं० ३१७ ॥ २६ ॥ या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ॥ नमस्तस्यै ॥ मं० ३१८॥ नमस्तस्यै ॥ मं० ३१९ ॥ नमस्तस्यै नमोनमः ॥ मं० ३२० ॥ २७ ॥

स॰ या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ॥ नमस्त-
१४ स्यै ॥ मं॰ ३२१ ॥ नमस्तस्यै ॥ मं॰ ३२२ ॥ नमस्त-
स्यै नमोनमः ॥ मं॰ ३२३ ॥ २८ ॥ या देवी सर्वभूते-
षु दयारूपेण संस्थिता ॥ नमस्तस्यै ॥ मं॰ ३२४ ॥
नमस्तस्यै ॥ मं॰ ३२५ ॥ नमस्तस्यै नमोनमः ॥ मं॰
३२६ ॥ २९ ॥ या देवी सर्वभूतेषु तुष्टिरूपेण संस्थि-
ता ॥ नमस्तस्यै ॥ मं॰ ३२७ ॥ नमस्तस्यै ॥ मं॰ ३२८
अ॰ ॥ नमस्तस्यै नमोनमः ॥ मं॰ ३२९ ॥ ३० ॥ या देवी
५ सर्वभूतेषु मातृरूपेण संस्थिता ॥ नमस्तस्यै ॥ मं॰
३३० ॥ नमस्तस्यै ॥ मं॰ ३३१ ॥ नमस्तस्यै नमोनमः

॥ मं० ३३२ ॥ ३१ ॥ या देवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता ॥ नमस्तस्यै ॥ मं० ३३३ ॥ नमस्तस्यै ॥ मं० ३३४ ॥ नमस्तस्यै नमोनमः ॥ मं० ३३५ ॥ ३२ ॥ इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ॥ भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमोनमः ॥ मं० ३३६ ॥ ३३ ॥ चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥ नमस्तस्यै ॥ मं० ३३७ ॥ नमस्तस्यै ॥ मं० ३३८ ॥ नमस्तस्यै नमोनमः ॥ मं० ३३९ ॥ ३४ ॥ स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेंद्रेण दिनेषु सेविता ॥ करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्य

स० भिहंतु चापदः ॥ मं० ३४० ॥ ३५ ॥ या सांप्रतं चो-
९५ द्धतदैत्यतापि तैरस्माभिरीशा च सुरैर्नमस्यते ॥
या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्ति-
विनम्रमूर्तिभिः ॥ मं० ३४१ ॥ ३६ ॥ ऋषिरुवाच ॥
मं० ३४२ ॥ एवं स्तवादियुक्तानां देवानां तत्र पार्वती
॥ स्नातुमभ्याययौ तोये जाह्नव्या नृपनंदन ॥ मं०
३४३ ॥ ३७ ॥ साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयते
अ० त्र का ॥ शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छि-
५ वा ॥ मं० ३४४ ॥ ३८ ॥ स्तोत्रं ममैतत्क्रियते शुंभ-
दैत्यनिराकृतैः ॥ देवैः समेतैः समरे निशुंभेन पराजितैः

॥म० ३४५॥३१॥ शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिक

स॰ ॥कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥मं॰३४६
९६ ॥ ४०॥ तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती
॥ कालिकेति समाख्याता हिमाचलकृताश्रया ॥ मं॰
३४७ ॥ ४१ ॥ ततोम्बिकां परं रूपं बिभ्राणां सुमनो-
हरम् ॥ ददर्श चण्डो मुण्डश्च भृत्यौ शुंभनिशुंभयोः
॥ मं॰ ३४८ ॥ ४२॥ ताभ्यां शुंभाय चाख्याता अती-
व सुमनोहरा ॥ काप्यास्ते स्त्री महाराज भासयंती
अ॰ हिमाचलम् ॥ मं॰ ३४९ ॥ ४३ ॥ नैव तादृक्क्वचि-
५ द्रूपं दृष्टं केनचिदुत्तमम् ॥ ज्ञायतां काप्यसौ देवी गृ-
ह्यतां चासुरेश्वर ॥ मं॰ ३५० ॥ ४४ ॥ स्त्रीरत्नमतिचा-

वंगी द्योतयंती दिशस्त्विषा॥सातु तिष्टति दैत्येंद्र
तां भवान्द्रष्टुमर्हति ॥ मं०३५१ ॥ ४५ ॥ यानि रत्ना-
नि मणयो गजाश्वादीनि वै प्रभो ॥ त्रैलोक्ये तु स-
मस्तानि सांप्रतं भांति ते गृहे ॥ मं० ३५२ ॥ ४६ ॥
ऐरावतः समानीतो गजरत्नं पुरन्दरात् ॥ पारिजात
तरुश्चायं तथैवोच्चैःश्रवा हयः ॥ मं० ३५३ ॥ ४७ ॥ वि-
मानं हंससंयुक्तमेतत्तिष्ठति तेङ्गणे ॥ रत्नभूतमि-
हानीतं यदासीद्वेधसोऽद्भुतम् ॥ मं० ३५४ ॥ ४८ ॥
निधिरेष महापद्मः समानीतो धनेश्वरात् ॥ किं-
जल्किनीं ददौ चाब्धिर्मालामम्लानपंकजाम् ॥ मं

स० ३५५ ॥ ४९ ॥ छत्रं ते वारुणं गेहे कांचनस्रावि ति-
१७ ष्ठति ॥ तथायं स्यंदनवरो यः पुरासीत्प्रजापतेः ॥
मं० ३५६ ॥ ५० ॥ मृत्योरुत्क्रांतिदा नाम शक्तिरीश
त्वयाहृता ॥ पाशः सलिलराजस्य भ्रातुस्तव परि-
ग्रहे ॥ मं० ३५७ ॥ ५१ ॥ निशुंभस्याब्धिजाताश्च
समस्ता रत्नजातयः ॥ वह्निरपि ददौ तुभ्यमग्नि
शौचे च वाससी ॥ मं० ३५८ ॥ ५२ ॥ एवं दैत्यें-
अ० द्ररत्नानि समस्तान्याहृतानि ते ॥ स्त्रीरत्नमेषा
५ कल्याणी त्वया कस्मान्न गृह्यते ॥ मं० ३५९ ॥
५३ ॥ ॥ ऋषिरुवाच ॥ ॥ मं० ३६० ॥ नि

शम्येति वचः शुंभः स तदा चंडमुंडयोः ॥ प्रेष-
यामास सुग्रीवं दूतं देव्या महासुरम् ॥ मं० ३६१
॥ ५४ ॥ इति चेति च वक्तव्या सा गत्वा वच-
नान्मम ॥ यथा चाभ्येति संप्रीत्या तथा का-
र्यं त्वया लघु ॥ मं० ३६२ ॥ ५५ ॥ स तत्र ग-
त्वा यत्रास्ते शैलोद्देशेऽतिशोभने ॥ सा देवी तां
ततः प्राह श्लक्ष्णं मधुरया गिरा ॥ मं० ३६३ ॥
॥ ५६ ॥ ॥ दूत उवाच ॥ ॥ मं० ३६४
॥ देवि दैत्येश्वरः शुंभस्त्रैलोक्ये परमेश्वरः ॥

दूतोहं प्रेषितस्तेन त्वत्सकाशमिहागतः॥ मं०

३६५ ॥ ५७ ॥ अव्याहताज्ञः सर्वासु यः सदा देव-
योनिषु ॥ निर्जिताखिलदैत्यारिः स यदाह शृणुष्व
तत् ॥ मं० ३६६ ॥ ५८॥ मम त्रैलोक्यमखिलं मम दे
वा वशानुगाः ॥ यज्ञभागानहं सर्वानुपाश्नामि पृथ-
क्पृथक् ॥ मं० ३६७ ॥ ५९ ॥ त्रैलोक्ये वररत्नानि मम
वश्यान्यशेषतः ॥ तथैव गजरत्नं च हृतं देवेंद्रवाह
नम् ॥ मं० ३६८ ॥ ६० ॥ क्षीरोदमथनोद्भूतमश्वरत्नं म-
मामरैः ॥ उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥
॥ मं० ३६९ ॥ ६१ ॥ यानि चान्यानि देवेषु गंधर्वेषू रगे-
षु च ॥ रत्नभूतानि भूतानि तानि मय्येव शोभने

स० ॥ मं०३७०॥ ६२॥ स्त्रीरत्नभूतां त्वां देवि लोके म-
११ न्यामहे वयम् ॥ सा त्वमस्मानुपागच्छ यतो रत्नभु-
जो वयम् ॥ मं० ३७१ ॥ ६३॥ मां वा ममानुजं वा-
पि निशुंभमुरुविक्रमम् ॥ भज त्वं चंचलापांगि र-
त्नभूतासि वै यतः ॥ मं० ३७२ ॥ ६४॥ परमैश्वर्यम-
तुलं प्राप्स्यसे मत्परिग्रहात् ॥ एतद्बुद्ध्या समालो
च्य मत्परिग्रहतां व्रज ॥ मं० ३७३ ॥ ६५॥ ऋषिरु-
अ० वाच ॥ मं० ३७४ ॥ इत्युक्ता सा तदा देवी गंभीरां
५ तः स्मिता जगौ ॥ दुर्गा भगवती भद्रा ययेदं धार्यते
जगत् ॥ मं० ३७५ ॥ ६६ ॥ देव्युवाच ॥ मं०३७६

॥ सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितम् ॥

स० त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः ॥ मं०
१०० ३७७ ॥ ६७ ॥ किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रि-
यते कथम् ॥ श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृ-
ता पुरा ॥ मं० ३७८ ॥ ६८ ॥ यो मां जयति संग्रामे
यो मे दर्पं व्यपोहति ॥ यो मे प्रतिबलो लोके स मे
भर्ता भविष्यति ॥ मं० ३७९ ॥ ६९ ॥ तदाऽऽगच्छ-
तु शुंभोत्र निशुंभो वा महासुरः ॥ मां जित्वा किं
अ० चिरेणात्र पाणिं गृह्णातु मे लघु ॥ मं० ३८० ॥ ७० ॥
५ ॥ दूतउवाच ॥ मं० ३८१ ॥ अवलिप्तासि मैवं
त्वं देवि ब्रूहि ममाग्रतः ॥ त्रैलोक्ये कः पुमांस्ति-

ष्टेदग्रे शुंभनिशुंभयोः ॥ मं० ३८२ ॥ ७१ ॥ अन्ये-
षामपि दैत्यानां सर्वे देवा न वै युधि ॥ तिष्ठंति सं-
मुखे देवि किं पुनः स्त्री त्वमेकिका ॥ मं० ३८३ ॥ ७२ ॥
इंद्राद्यास्सकला देवास्तस्थुर्येषां न संयुगे ॥ शुंभादी-
नां कथं तेषां स्त्री प्रयास्यसि संमुखम् ॥ मं० ३८४ ॥
७३ ॥ सा त्वं गच्छ मयैवोक्ता पार्श्वं शुंभनिशुंभयोः
॥ केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥ मं० ३८५
॥ ७४ ॥ देव्युवाच ॥ मं० ३८६ ॥ एवमेतद्बली शुं-
भो निशुंभश्चातिवीर्यवान् ॥ किं करोमि प्रतिज्ञा मे
यदनालोचिता पुरा ॥ मं० ३८७ ॥ ७५ ॥ स त्वं गच्छ

स० मयोक्तं ते यदेतत्सर्वमादृतः ॥ तदाचक्ष्वासुरेंद्राय
१०१ स च युक्तं करोतु यत् ॥ मं० ३८८ ॥ ७६ ॥ ॥ इति
श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहा-
त्म्ये देव्या दूतसंवादो नाम पञ्चमोऽध्यायः ॥ ५ ॥
श्लोकाः ॥ ७६ ॥ एवमादितः ॥ २९९ ॥ ॥

अ०
५



इति पञ्चमोऽध्यायः।

अथदुर्गासप्तशती।

अध्यायः ६

॥ ध्यानम् ॥ नागाधीश्वरविष्टरां फणिफणोत्तंसोरुरत्नावलीं भास्वद्देहलतां
दिवाकरनिभां नेत्रत्रयोद्भासिताम् ॥ मालाकुम्भकपालनीरजकरां चन्द्रार्धचू-
डां परां सर्वज्ञेश्वरभैरवांकनिलयां पद्मावतीं चिन्तये ॥ १ ॥

श्रीः ॥ ऋषिरुवाच ॥ मं० ३८९ ॥ इत्याकर्ण्य वचो
देव्याः स दूतोमर्षपूरितः ॥ समाचष्ट समागम्य दैत्य-
राजाय विस्तरात् ॥ मं० ३९० ॥ १ ॥ तस्य दूतस्य त-
द्वाक्यमाकर्ण्यासुरराट् ततः ॥ सक्रोधः प्राह दैत्या-
नामधिपं धूम्रलोचनम् ॥ मं० ३९१ ॥ २ ॥ हे धूम्रलो-
चनाशु त्वं स्वसैन्यपरिवारितः ॥ तामानय बलाद्दु-
ष्टां केशाकर्षणविह्वलाम् ॥ मं० ३९२ ॥ ३ ॥ तत्परित्रा-
णदः कश्चिद्यदि वोत्तिष्ठते परः ॥ स हंतव्योऽमरो वा-
पि यक्षोगंधर्व एव वा ॥ मं० ३९३ ॥ ४ ॥ ऋषिरुवाच
॥ मं० ३९४ ॥ तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः

स० वृतः षष्ट्या सहस्राण । मसुराणां द्रुतं ययौ ॥ मं० ३९५ ॥

१०४

अ०

६

॥५॥ सद्दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम्
॥जगादोच्चैः प्रयाहीति मूलं शुंभनिशुंभयोः॥ मं०
३९६॥६॥ न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति
॥ ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥
मं० ३९७ ॥ ७ ॥ ॥ देव्युवाच ॥ ॥ मं० ३९८
॥ दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ॥ बलान्न
यसि मामेवं ततः किं ते करोम्यहम् ॥ मं० ३९९
॥ ८ ॥ ॥ ऋषिरुवाच ॥ ॥ मं० ४०० ॥
इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ॥

स०

१०५

हुंकारेणैव तं भस्म सा चकारांबिका ततः ॥ मं० ४०१ ॥ १ ॥



अ०

६

॥ अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ॥ ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥ मं० ४०२ ॥ १० ॥ ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ॥ पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥ मं० ४०३ ॥ ११ ॥ कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ॥ आक्रान्त्या चाधरेणान्यान्स जघान महासुरान् ॥ मं० ४०४ ॥ १२ ॥ केषांचित्पाटयामास नखैः कोष्ठानि केसरी ॥ तथा तलप्रहारेण शिरांसि कृतवान्पृथक् ॥ मं० ४०५ ॥ १३ ॥ विच्छिन्नबाहुशिरसः

स० कृतास्तेन तथापरे॥ पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः

१०६

अ० ८

॥मं० ४०६॥ १४॥ क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना॥ तेन केसरिणा देव्या वाहनेनातिकोपिना॥ मं० ४०७॥ १५॥ श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम्॥ बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः॥ मं० ४०८॥ १६॥ चुकोप दैत्याधिपतिः शुंभः प्रस्फुरिताधरः॥ आज्ञापयामास च तौ चंडमुंडौ महासुरौ॥ मं० ४०९॥ १७॥ हे चंड हे मुंड बलैर्बहुभिः परिवारितौ॥ तत्र गच्छत गत्वा च सा समानीयतां लघु॥ मं० ४१०॥ १८॥

स० केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ॥ त
१०७ दाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥ मं० ४११ ॥
१९ ॥ तस्यां हतायां दुष्टायां सिंहे च विनिपातिते
॥ शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथांबिकाम् ॥
मं० ४१२ ॥ २० ॥ इति श्रीमार्कण्डेयपुराणे साव
र्णिके मन्वंतरे देवीमाहात्म्ये धूम्रलोचनवधो नाम
षष्ठोऽध्यायः ॥ ६ ॥ श्लोकाः ॥ २० ॥ एवमा० ॥ ३१९

अ०
६

इति षष्ठोऽध्यायः ।

अथ दुर्गासप्तशती।

अध्यायः ७.

स॰ १०९

अ॰ ७

॥ध्यानम्॥ ध्यायेयं रत्नपीठे शुककलपठितं शृण्वतीं श्यामलाङ्गीं न्यस्तैकांघ्रिं स-
रोजे शशिशकलधरां वल्लकीं वादयन्तीम् ॥ कह्लारबद्धमालां नियमितविलसच्चू-
डिकां रक्तवस्त्रां मातङ्गीं शंखपात्रां मधुरमधुमदां चित्रकोद्भासिभालाम् ॥ १ ॥

श्रीगणेशाय नमः
॥ऋषिरुवाच॥
मं० ४१३ ॥ आज्ञ
प्तास्ते ततो दै-
त्याश्चंडमुंडपुरो
गमाः॥ चतुरंग
बलोपेता ययुर
भ्युद्यतायुधाः॥
मं०४१४॥ १॥
ददृशुस्ते ततो

स० देवीमीषद्धासां व्यवस्थिताम् ॥ सिंहस्योपरि शै-
११० लेंद्रशृङ्गे महति कांचने ॥ मं० ४१५ ॥ २ ॥ ते दृ
ष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ॥ आकृष्टचा
पासिधरास्तथान्ये तत्समीपगाः ॥ मं० ४१६ ॥ ३ ॥
ततः कोपं चकारोच्चैरंबिका तानरीन्प्रति ॥ कोपे
न चास्या वदनं मषीवर्णमभूत्तदा ॥ मं० ४१७ ॥ ४
॥ भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ॥ का
अ० ली करालवदना विनिष्क्रांतासिपाशिनी ॥ मं० ४१८
७ ॥ ५ ॥ विचित्रखट्वांगधरा नरमालाविभूषणा ॥ द्वी
पिचर्मपरीधाना शुष्कमांसातिभैरवा ॥ मं० ४१९ ॥ ६ ॥

अतिविस्तारवदना जिह्वाललनभीषणा ॥ निमग्ना

स॰ रक्तनयना नादापूरितदिङ्मुखा ॥ मं॰ ४२० ॥ ७ ॥
१११ सा वेगेनाभिपतिता घातयन्तीमहासुरान् ॥ सैन्ये
तत्र सुरारीणामभक्षयत तद्बलम् ॥ मं॰ ४२१ ॥ ८ ॥
पार्ष्णिग्राहांकुशग्राहयोधघंटासमन्वितान् ॥ समा-
दायैकहस्तेन मुखे चिक्षेप वारणान् ॥ मं॰ ४२२ ॥ ९
॥ तथैव योधं तुरगैरथं सारथिना सह ॥ निक्षिप्य
वक्त्रे दशनैश्चर्वयंत्यतिभैरवम् ॥ मं॰ ४२३ ॥ १० ॥
अ॰ एकं जग्राह केशेषु ग्रीवायामथ चापरम् ॥ पादेना
७ क्रम्य चैवान्यमुरसान्यमपोथयत् ॥ मं॰ ४२४ ॥ ११
॥ तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः

॥ मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥ मं०४२५ ॥

स॰ ॥१२॥ बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम् ॥म
११२ मर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥ मं॰ ४२६॥
१३॥ असिना निहताः केचित्केचित्खट्वाङ्गताडिताः
॥जग्मुर्विनाशमसुरा दंताग्राभिहतास्तथा ॥ मं॰ ४२७
॥ १४॥ क्षणेन तद्बलं सर्वमसुराणां निपातितम् ॥
दृष्ट्वा चंडोभिदुद्राव तां कालीमतिभीषणाम् ॥ मं॰ ४२८
॥ १५ ॥ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ॥ छा
अ॰ दयामास चक्रैश्च मुंड क्षिप्तैः सहस्रशः ॥ मं॰ ४२९
७ ॥ १६ ॥ तानि चक्राण्यनेकानि विशमानानि तन्मु
खम् ॥ बभुर्यथार्कबिंबानि सुबहूनि घनोदरम् ॥ मं॰

४३०॥१७॥ ततो जहासातिरुषा भीमं भैरवनादि
नी ॥ काली करालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला ॥
मं०४३१॥१८॥ उत्थाय च महासिंहं देवी चंडम-
धावत ॥ गृहीत्वा चास्य केशेषु शिरस्तेनासिना
च्छिनत् ॥ मं०४३२॥१९॥ अथ मुंडोभ्यधावत्तां
दृष्ट्वा चंडं निपातितम् ॥ तमप्यपातयद्भूमौ सा ख
ड्गाभिहतं रुषा ॥ मं०४३३॥२०॥ हतशेषं ततः सै
न्यं दृष्ट्वा चंडं निपातितम् ॥ मुंडं च सुमहावीर्यं
दिशो भेजे भयातुरम् ॥ मं०४३४॥२१॥ शिरश्चं
डस्य काली च गृहीत्वा मुण्डमेव च ॥ प्राह प्रचंडा

स० ११३ ट्टहासमिश्रमभ्येत्य
चंडिकाम् ॥ मं० ४३५
॥२२॥ मया तवात्रो
पहृतौ चण्ड मुंडौ
महापशू ॥ युद्धय
ज्ञे स्वयं शुंभं निशुं
भंच हनिष्यसि ॥
अ० मं० ४३६ ॥ २३ ॥
७ ॥ ऋषिरुवाच ॥ मं०
४३७ ॥ तावानीतौ

ततो दृष्ट्वा चंडमुंडौ महासुरौ ॥ उवाच कालीं क
ल्याणी ललितं चंडिका वचः ॥ मं० ४३८ ॥ २४ ॥
यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता ॥ चा
मुंडेति ततो लोके ख्याता देवी भविष्यसि ॥ मं० ४३९
॥ २५ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वं
तरे देवीमाहात्म्ये चण्डमुण्डवधो नाम सप्तमोऽध्या
यः ॥ ७ ॥ ॥ श्लोकाः ॥ २५ ॥ एवमादितः ॥ ३४४ ॥

इति सप्तमोऽध्यायः ।

अथ दुर्गासप्तशती ।

अध्यायः ८

स०

११५

अ०

८

ध्यानम्॥ अरुणां करुणातरङ्गिताक्षीं धृतपाशांकुशमुख्यचापहस्ताम्॥ अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम् ॥ १ ॥

॥श्रीः॥ ऋषिरुवाच ॥ मं॰ ४५० ॥ चंडे च निहते दैत्ये मुण्डे च विनिपातिते ॥ बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ मं॰ ४५१ ॥ १ ॥ ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ॥ उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥ मं॰ ४५२ ॥ २ ॥ अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ॥ कंबूनां चतुर शीतिर्निर्यान्तु सबलैर्वृताः ॥ मं॰ ४५३ ॥ ३ ॥ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै ॥ शतं कुलानि धूम्राणां निर्गच्छन्तु ममाज्ञया ॥ मं॰ ४५४ ॥ ४ ॥ कालकादौर्हृदा मौर्याः कालिकेयास्तथासुराः ॥ युद्धाय सज्जा

निर्यांतु आज्ञया त्वरिता मम ॥ मं॰ ४४५ ॥ ५ ॥ इत्या
ज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ॥ निर्जगाम महा
सैन्यसहस्रैर्बहुभिर्वृतः ॥ मं॰ ४४६ ॥ ६ ॥ आयातं च
ण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ॥ ज्यास्वनैः पूर
यामास धरणीगगनांतरम् ॥ मं॰ ४४७ ॥ ७ ॥ ततः
सिंहो महानादमतीव कृतवान्नृप ॥ घण्टास्वनेन तं
नादमंबिका चोपबृंहयत् ॥ मं॰ ४४८ ॥ ८ ॥ धनुर्ज्या
सिंहघण्टानां नादापूरितदिङ्मुखा ॥ निनादैर्भीषणैः
काली जिग्ये विस्तारितानना ॥ मं॰ ४४९ ॥ ९ ॥ तं
निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ॥ देवी सिंहस्त

था काली सरोषैः परिवारिता ॥ मं० ४५० ॥ १०

॥ एतस्मिन्नंतरे भूप विनाशाय सुरद्विषाम् ॥ भवायामरसिंहानामतिवीर्यबलान्विताः ॥ मं० ४५१ ॥ ११ ॥ ब्रह्मेश गुहविष्णूनां तथेंद्रस्यच शक्तयः ॥ शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥ मं० ४५२ ॥ १२ ॥ यस्य देवस्य यद्रूपं यथा भूषणवाहनम् ॥ तद्वदेव हि तच्छक्ति-रसुरान्योद्धुमाययौ ॥ मं० ४५३ ॥ १३ ॥

स० ११७

हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः॥ आयाता ब्रह्मणः शक्ति



अ० ८

ब्रह्माणी साभिधीयते ॥ मं० ४५४ ॥ १४ ॥ माहेश्वरी वृषारूढा त्रिशूल

स० वरधारिणी॥महाहि
११८ वलया भासा च-
न्द्ररेखाविभूषणा
॥मं० ४५५॥ १५॥
कौमारी शक्तिह
स्ता च मयूरवर
वाहना॥ योद्धुम
अ० भ्याययौ दैत्यान
८ बिका गुहरूपिणी
॥मं० ४५६॥१६॥

तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ॥ शंखचक्रगद



स॰ शार्ङ्गखड्गहस्ता
११९ भ्युपाययौ ॥ मं॰
४५७ ॥ १७ ॥ यज्ञ
वाराहमतुलं रूपं
याबिभ्रतीहरेः ॥
शक्तिः साप्याययौ-
तत्र वाराहीं बिभ्र
अ॰ तीतनुम् ॥ मं॰
८ ४५८ ॥ १८ ॥

नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।। प्राप्ता तत्र सटाक्षे

पक्षिप्तनक्षत्रसंहतिः॥ मं० ४५९॥ १९॥ वज्रहस्ता तथैवैंद्री गजराजो



परिस्थिता ॥ प्राप्ता सहस्रनयना यथा शक्रस्तथैव
सा ॥ मं० ४६० ॥ २० ॥ ततः परिवृतस्ताभिरीशानो
देवशक्तिभिः ॥ हन्यंतामसुराः शीघ्रं मम प्रीत्याह च
ण्डिकाम् ॥ मं० ४६१ ॥ २१ ॥ ततो देवीशरीरात्तु
विनिष्क्रांतातिभीषणा ॥ चण्डिकाशक्तिरत्युग्रा शि
वाशतनिनादिनी ॥ मं० ४६२ ॥ २२ ॥ सा चाह धू
म्रजटिलमीशानमपराजिता ॥ दूतत्वं गच्छ भगव-
न्पार्श्वं शुंभनिशुंभयोः ॥ मं० ४६३ ॥ २३ ॥ ब्रूहि शुं
भं निशुंभं च दानवावतिगर्विनौ ॥ ये चान्ये दानवा
स्तत्र युद्धाय समुपस्थिताः ॥ मं० ४६४ ॥ २४ ॥

स० त्रैलोक्यमिन्द्रो लभतां देवाः संतु हविर्भुजः ॥ यूयं प्र
१२१ यात पातालं यदि जीवितुमिच्छथ ॥ मं० ४६५॥२५
॥बलावलेपादथ चेद्भवंतो युद्धकांक्षिणः ॥ तदागच्छ
त तृप्यंतु मच्छिवाःपिशितेन वः ॥ मं० ४६६ ॥ २६॥
यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ॥ शि
वदूतीति लोकेस्मिंस्ततः साख्यातिमागता ॥ मं०
४६७ ॥ २७ ॥ तेपि श्रुत्वा वचो देव्याः शर्वाख्यातंम
अ० हासुराः ॥ अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थि
८ ता ॥ मं० ४६८ ॥ २८॥ ततःप्रथममेवाग्रे शरशक्त्यृ
ष्टिवृष्टिभिः ॥ ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥

मं० ४६९ ॥ २९॥ सा च तान्प्रहितान्बाणाञ्छूलश
क्तिपरश्वधान् ॥ चिच्छेद लीलयाध्मातधनुर्मुक्तैर्म
हेषुभिः ॥ मं० ४७० ॥ ३०॥ तस्याग्रतस्तथा कालीशू
लपातविदारितान् ॥ खट्वांगपोथितांश्चारीन्कुर्वती
व्यचरत्तदा ॥ मं० ४७१ ॥ ३१ ॥ कमंडलुजलाक्षेपह
तवीर्यान्हतौजसः ॥ ब्रह्माणी चाऽकरोच्छत्रून्येनयेन
स्म धावति ॥ मं० ४७२ ॥ ३२॥ माहेश्वरी त्रिशूलेन
तथा चक्रेण वैष्णवी ॥ दैत्याञ्जघान कौमारी तथा
शक्त्यातिकोपना ॥ मं० ४७३ ॥ ३३ ॥ ऐंद्री कुलिश
पातेन शतशो दैत्यदानवाः ॥ पेतुर्विदारिताः पृथ्व्यां

रुधिरौघप्रवर्षिणः ॥ मं० ४७४ ॥ ३४ ॥ तुंडप्रहारविध्व
स्ता दंष्ट्राग्रक्षतवक्षसः ॥ वाराहमूर्त्या न्यपतंश्चक्रेण
च विदारिताः ॥ मं० ४७५ ॥ ३५ ॥ नखैर्विदारितांश्चा
न्यान्भक्षयंती महासुरान् ॥ नारसिंही चचाराजौ ना
दापूर्णदिगंबरा ॥ मं० ४७६ ॥ ३६ ॥ चंडाट्टहासैरसु
राः शिवदूत्यभिदूषिताः ॥ पेतुः पृथिव्यां पतितांस्तांश्च
खादाथ सा तदा ॥ मं० ४७७ ॥ ३७ ॥ इति मातृगणं
क्रुद्धं मर्दयंतं महासुरान् ॥ दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्दे
वारिसैनिकाः ॥ मं० ४७८ ॥ ३८ ॥ पलायनपरान्दृष्ट्वा
दैत्यान्मातृगणार्दितान् ॥ योद्धुमभ्याययौ क्रुद्धो रक्त

बीजो महासुरः ॥ मं० ४७९ ॥ ३९ ॥ रक्तबिंदुर्यदा भू
मौ पतत्यस्य शरीरतः ॥ समुत्पतति मेदिन्यास्तत्प्रमा
णस्तदासुरः ॥ मं० ४८० ॥ ४० ॥ युयुधे स गदापाणि
रिंद्रशक्त्या महासुरः ॥ ततश्चैंद्री स्ववज्रेण रक्तबी-
जमताडयत् ॥ मं० ४८१ ॥ ४१ ॥ कुलिशेनाहतस्या
शु बहु सुस्राव शोणितम् ॥ समुत्तस्थुस्ततो योधा-
स्तद्रूपास्तत्पराक्रमाः ॥ मं० ४८२ ॥ ४२ ॥ यावंतः
पतितास्तस्य शरीराद्रक्तबिंदवः ॥ तावंतः पुरुषा
जातास्तद्वीर्यबलविक्रमाः ॥ मं० ४८३ ॥ ४३ ॥ ते
चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः ॥ समं मातृभि

स०

१२३

रत्युग्रशस्त्रपातातिभीषणम् ॥ मं० ४८४ ॥ ४४ ॥

अ०

८

पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ॥ ववाह रक्त

पुरुषास्ततो जातास्सहस्रशः ॥ मं० ४८५ ॥ ४५ ॥ वै

ष्णावी समरे चैनं चक्रेणाभिजघान ह ॥ गदया ताड-

यामास ऐंद्रीतमसुरेश्वरम् ॥ मं० ४८६ ॥ ४६ ॥ वै

ष्णावीचक्रभिन्नस्य रुधिरस्रावसंभवैः ॥ सहस्रशो ज

गद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥ मं० ४८७ ॥ ४७ ॥ श

क्त्या जघान कौमारी वाराही च तथासिना ॥ माहे

श्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥ मं० ४८८ ॥ ४८

॥ स चापि गदया दैत्यः सर्वा एवाहनत्पृथक् ॥ मा

तृः कोपसमाविष्टो रक्तबीजो महासुरः ॥ मं० ४८९

 ॥ ४९ ॥ तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि
 ॥ पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥ मं०
४९० ॥ ५० ॥ तैश्चासुरासृक्संभूतैरसुरैस्सकलं जग
त् ॥ व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥
मं० ४९१ ॥ ५१ ॥ तान्विषण्णान्सुरान्दृष्ट्वा चंडि-
का प्राह सत्वरा ॥ उवाच कालीं चामुंडे विस्तीर्णव
दनं कुरु ॥ मं० ४९२ ॥ ५२ ॥ मच्छस्त्रपातसंभूता
 न्रक्तबिंदून्महासुरान् ॥ रक्तबिंदोः प्रतीच्छ त्वं व
 क्त्रेणानेन वेगिना ॥ मं० ४९३ ॥ ५३ ॥ भक्षयंती च
र रणे तदुत्पन्नान्महासुरान् ॥ एवमेष क्षयं दैत्यः

क्षीणरक्तो गमिष्यति ॥ मं० ४९४ ॥ ५४ ॥ भक्ष्यमा
णास्त्वया चोग्रा न चोत्पत्स्यंति चापरे ॥ इत्युक्त्वा
तां ततो देवी शूलेनाभिजघान तम् ॥ मं० ४९५ ॥
५५ ॥ मुखेन काली जगृहे रक्तबीजस्य शोणितम्
॥ ततोसावाजघानाथ गदया तत्र चंडिकाम् ॥ मं०
४९६ ॥ ५६ ॥ न चास्या वेदनां चक्रे गदापातो
ल्पिकामपि ॥ तस्याहतस्य देहात्तु बहु सुस्राव शो
णितम् ॥ मं० ४९७ ॥ ५७ ॥ यतस्ततस्तद्वक्त्रेण चा
मुंडा संप्रतीच्छति ॥ मुखे समुद्गता येस्या रक्तपाता
न्महासुराः ॥ मं० ४९८ ॥ ५८ ॥ तांश्चखादाथ

स० १२५

चामुंडा पपौ तस्य च शोणितम् ॥ देवी शूलेन वज्रेण

अ० ८

बाणैरसिभिर्ऋष्टिभिः ॥ मं॰ ४९९ ॥ ५९ ॥ जघान
रक्तबीजं तं चामुंडा पीतशोणितम् ॥ स पपात म-
हीपृष्ठे शस्त्रसंघसमाहतः ॥ मं॰ ५००॥ ६०॥ नीर
क्तश्च महीपाल रक्तबीजो महासुरः ॥ ततस्ते हर्षम
तुलमवापुस्त्रिदशा नृप ॥ मं॰ ५०१ ॥ ६१ ॥ तेषां
मातृगणो जातोननर्ता ऽसृङ्मदोद्धतः ॥ मं॰ ५०२
॥ ६१ ॥ ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके म
न्वंतरे देवीमाहात्म्ये रक्तबीजवधो नामाष्टमोऽध्यायः
॥८॥ श्लोकाः ॥ ६१ ॥ एवमादितः ॥ ४०५ ॥

इति अष्टमोऽध्यायः।

अथदुर्गासप्तशती।

अध्यायः ९

स० १२७



॥ ध्यानम् ॥ बन्धूककाञ्चननिभं रुचिराक्षमालां पाशाङ्कुशौ च वरदं निजबाहु
दंडैः ॥ बिभ्राणमिंदुशकलाभरणं त्रिनेत्रमम्बाम्बिकेशमनिशं वपुराश्रयामि ॥ १ ॥

अ० ९

श्रीगणेशाय नमः ॥ ॥ राजोवाच ॥ मं० ५०३ ॥
विचित्रमिदमाख्यातं भगवन्भवता मम ॥ देव्याश्चरि
तमाहात्म्यं रक्तबीजवधाश्रितम् ॥ मं० ५०४ ॥ १ ॥
भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ॥ चकार
शुंभो यत्कर्म निशुंभश्चातिकोपनः ॥ मं० ५०५ ॥ २ ॥
॥ ॥ ऋषिरुवाच ॥ मं० ५०६ ॥ चकार कोपमतु
लं रक्तबीजे निपातिते ॥ शुंभासुरो निशुंभश्च हतेष्व
न्येषु चाहवे ॥ मं० ५०७ ॥ ३ ॥ हन्यमानं महासैन्यं
विलोक्यामर्षमुद्वहन् ॥ अभ्यधावन्निशुंभोथ मुख्य
यासुरसेनया ॥ मं० ५०८ ॥ ४ ॥ तस्याग्रतस्तथा पृ

स॰ ष्ठे पार्श्वयोश्च महासुराः ॥ संदष्टौष्ठपुटाः क्रुद्धा हंतुं
१२८ देवीमुपाययुः ॥ मं॰ ५०९ ॥ ५ ॥ आजगाम महावी
र्यः शुंभोपि स्वबलैर्वृतः ॥ निहंतुं चंडिकां कोपात्कृ
त्वा युद्धं तु मातृभिः ॥ मं॰ ५१० ॥ ६ ॥ ततो युद्धमतीवा
सीद्देव्याः शुंभनिशुंभयोः ॥ शरवर्षमतीवोग्रं मेघयोरि
व वर्षतोः ॥ मं॰ ५११ ॥ ७ ॥ चिच्छेदाऽस्ताञ्छरां
स्ताभ्यां चंडिका स्वशरोत्करैः ॥ ताडयामास चांगेषु
अ॰ शस्त्रौघैरसुरेश्वरौ ॥ मं॰ ॥ ५१२ ॥ ८ ॥ निशुंभो नि-
९ शितं खड्गं चर्म चादाय सुप्रभम् ॥ अताडयन्मूर्ध्नि सिं
हं देव्या वाहनमुत्तमम् ॥ मं॰ ५१३ ॥ ९ ॥ ताडिते

वाहने देवी क्षुरप्रेणासिमुत्तमम् ॥ निशुम्भस्याशु
चिच्छेद चर्मचाप्यष्टचंद्रकम् ॥ मं० ५१४ ॥ १० ॥
छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेपसोऽसुरः ॥ ता
मप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥ मं०
५१५ ॥ ११ ॥ कोपाध्मातो निशुंभोथ शूलं जग्राह
दानवः ॥ आयांतं मुष्टिपातेन देवीतच्चाप्यचूर्णय
त् ॥ मं० ५१६ ॥ १२ ॥ आविध्याथ गदां सोपि चि
क्षेप चंडिकां प्रति ॥ सापि देव्यास्त्रिशूलेन भिन्ना
भस्मत्वमागता ॥ मं० ५१७ ॥ १३ ॥ ततः परशुहस्तं
तमायांतं दैत्यपुंगवम् ॥ आहत्य देवी बाणौघैरपा

स० तयत भूतले ॥ मं० ५१८ ॥ १४ ॥ तस्मिन्निपतिते
१२९ भूमौ निशुंभे भीमविक्रमे ॥ भ्रातर्यतीव संक्रुद्धः प्र
ययौ हंतुमंबिकाम् ॥ मं० ५१९ ॥ १५ ॥ सरथस्थस्त
थात्युच्चैर्गृहीतपरमायुधैः ॥ भुजैरष्टाभिरतुलैर्व्याप्या
शेषं बभौ नभः ॥ मं० ५२० ॥ १६ ॥ तमायांतं समा
लोक्य देवी शंखमवादयत् ॥ ज्याशब्दं चापि धनुष
श्चकारातीव दुस्सहम् ॥ मं० ५२१ ॥ १७ ॥ पूरयामा
अ० स ककुभो निजघंटास्वनेन च ॥ समस्तदैत्यसैन्या
९ नां तेजोवधविधायिना ॥ मं० ५२२ ॥ १८ ॥ ततः सिं
हो महानादैस्त्याजितेभमहामदैः ॥ पूरयामास गग

नं गां तथैव दिशोदश ॥ मं० ५२३ ॥ १९॥ ततः का
लीसमुत्पत्य गगनं क्ष्मामताडयत् ॥ कराभ्यां तन्नि
नादेन प्राक्स्वनास्तेतिरोहिताः ॥ मं० ५२४ ॥ २० ॥
अट्टट्टहासमशिवं शिवदूती चकार ह ॥ तैः शब्दैर
सुरास्त्रेसुः शुंभः कोपं परं ययौ ॥ मं० ५२५ ॥ २१ ॥
दुरात्मंस्तिष्ठतिष्ठेति व्याजहारांबिका यदा ॥ तदाज
येत्यभिहितं देवैराकाशसंस्थितैः ॥ मं० ५२६ ॥ २२ ॥शुं
भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ॥ आयांती
व ह्निकूटाभा सा निरस्ता महोल्कया ॥ मं० ५२७ ॥
२३ ॥ सिंहनादेन शुंभस्य व्याप्तं लोकत्रयान्तरम् ॥

स० निर्घातनिःस्वनो घोरो जितवानवनीपते ॥ मं० ५२८
१३० ॥२४॥ शुंभमुक्ताञ्छरान्देवी शुंभस्तत्प्रहिताञ्छरा
न् ॥ चिच्छेद स्वशरैरुग्रैः शतशोथ सहस्रशः ॥ मं० ५२९
॥२५॥ ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान
तम् ॥ स तदा निहतो भूमौ मूर्छितो निपपात ह ॥
मं० ५३० ॥ २६ ॥ ततो निशुंभः संप्राप्य चेतनामात्त
कार्मुकः ॥ आजघान शरैर्देवीं कालीं केसरिणं तथा
अ० ॥ मं० ५३१ ॥ २७ ॥ पुनश्च कृत्वा बाहूनामयुतं दनुजे
९ श्वरः ॥ चक्रायुधेन दितिजश्छादयामास चण्डिकाम्
॥ मं० ५३२ ॥ २८ ॥ ततो भगवती क्रुद्धा दुर्गा दुर्गा

र्विनाशिनी ॥ चिच्छेद तानि चक्राणि स्वशरैः सायकां
श्च तान् ॥ मं० ५३३ ॥ २९ ॥ ततो निशुंभो वेगेन गदा
मादाय चंडिकाम् ॥ अभ्यधावत वै हंतुं दैत्यसेनासमा
वृतः ॥ मं० ५३४ ॥ ३० ॥ तस्यापतत एवाशु गदां चि
च्छेद चंडिका ॥ खड्गेन शितधारेण स च शूलं समाद
दे ॥ मं० ५३५ ॥ ३१ ॥ शूलहस्तं समायांतं निशुंभम
मरार्दनम् ॥ हृदि विव्याध शूलेन वेगाविद्धेन चंडि
का ॥ मं० ५३६ ॥ ३२ ॥ भिन्नस्य तस्य शूलेन हृद
यान्निःसृतोपरः ॥ महाबलो महावीर्यस्तिष्ठेति पुरु
षो वदन् ॥ मं० ५३७ ॥ ३३ ॥ तस्य निष्क्रामतो देवी

स० प्रहस्य स्वनवत्ततः ॥ शिरश्चिच्छेद खड्गेन ततोसाव
१३१ पतद्भुवि ॥ मं० ५३८॥ ३४ ॥ ततः सिंहश्चखादोग्रदं
ष्ट्राक्षुण्णशिरोधरान् ॥ असुरांस्तांस्तथा काली शिवदू
ती तथापरान् ॥ मं०५३९ ॥ ३५ ॥ कौमारीशक्तिनि-
र्भिन्नाः केचिन्नेशुर्महासुराः ॥ ब्रह्माणीमंत्रपूतेन तो
येनान्ये निराकृताः ॥ मं० ५४० ॥ ३६ ॥ माहेश्वरीत्रि
शूलेन भिन्नाः पेतुस्तथापरे ॥ वाराहीतुंडघातेन के
अ० चिच्चूर्णीकृता भुवि ॥ मं० ५४१ ॥ ३७ ॥ खंडखंडंच
९ चक्रेण वैष्णव्या दानवाः कृताः ॥ वज्रेण चैंद्रीहस्ता
ग्र विमुक्तेन तथापरे ॥ मं० ५४२ ॥ ३८ ॥ केचिद्वि

नेशुरसुराः केचिन्नष्टा महाहवात् ॥ भक्षिताश्चापरे
काली शिवदूतीमृगाधिपैः ॥ मं० ५४३ ॥ ३९ ॥ ॥
इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमा-
हात्म्ये निशुंभवधो नाम नवमोऽध्यायः ॥ ९ ॥ ॥
॥ श्लोकाः ॥ ३९ ॥ ॥ एवमादितः ॥ ५४४ ॥ ॥

इति नवमोऽध्यायः ।

अथ दुर्गासप्तशती ।

अध्यायः १०



॥ ध्यानम् ॥ उत्तप्तहेमरुचिरां रविचन्द्रवह्निनेत्रां धनुश्शरयुतांकुशपाशशूल-
म् ॥ रम्यैर्भुजैश्च दधतीं शिवभक्तिरूपां कामेश्वरीं हृदि भजामि धृतेन्दुलेखाम्

॥श्रीः॥ऋषिरुवाच॥मं०५४४॥निशुंभंनिहतंदृष्ट्वाभ्रातरं



स॰ प्राणसंमितम् ॥ हन्यमानं बलं चैव शुंभः क्रुद्धोऽब्र
१३४ वीद्वचः ॥ मं॰ ५४५ ॥ १ ॥ बलावलेपाद्दुष्टे त्वं मा
दुर्गे गर्वमावह ॥ अन्यासां बलमाश्रित्य युध्यसे या
तिमानिनी ॥ मं॰ ५४६ ॥ २ ॥ देव्युवाच ॥ मं॰ ५४७
॥ एकैवाहं जगत्यत्र द्वितीया का ममापरा ॥ पश्यैता
दुष्टमय्येव विशंत्योमद्विभूतयः ॥ मं॰ ५४८ ॥ ३ ॥
ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ॥ त
अ॰ स्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका ॥ मं॰ ५४९ ॥
१० ॥ ४ ॥ ॥ देव्युवाच ॥ मं॰ ५५० ॥ अहं विभूत्या ब-
हुभिरिह रूपैर्यदास्थिता ॥ तत्संहृतं मयैकैव तिष्ठा

म्याजौ स्थिरो भव ॥ मं० ५५१ ॥ ५ ॥ ऋषिरुवाच॥
मं० ५५२ ॥ ततः प्रववृते युद्धं देव्याः शुंभस्य चोभयोः
॥ पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥ मं० ५५३
॥ ६ ॥ शरवर्षैः शितैः शस्त्रैस्तथैवास्त्रैश्च दारुणैः ॥ त
योर्युद्धमभूद्भूयः सर्वलोकभयंकरम् ॥ मं० ५५४ ॥ ७
॥ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथांबिका ॥
बभंज तानि दैत्येंद्रस्तत्प्रतीघातकर्तृभिः ॥ मं० ५५५
॥ ८ ॥ मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी
॥ बभंज लीलयैवोग्रहुंकारोच्चारणादिभिः ॥ मं० ५५६
॥ ९ ॥ ततश्शरशतैर्देवीमाच्छादयत सोऽसुरः ॥

स०
१३५

सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ मं०५५७

अ०
१०

॥ १० ॥ छिन्ने धनुषि दैत्येंद्रस्तथा शक्तिमथाददे ॥
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥ मं०
५५८ ॥ ११ ॥ ततः खड्गमुपादाय शतचंद्रं च भानु
मत् ॥ अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः ॥
॥ मं० ५५९ ॥ १२ ॥ तस्यापतत एवाशु खड्गं चिच्छे
द चंडिका ॥ धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरा
मलम् ॥ मं० ५६० ॥ १३ ॥ हताश्वः स तदा दैत्यश्छि
न्नधन्वा विसारथिः ॥ जग्राह मुद्गरं घोरमंबिकानिध
नोद्यतः ॥ मं० ५६१ ॥ १४ ॥ चिच्छेदापततस्तस्य
मुद्गरं निशितैः शरैः ॥ तथापि सोऽभ्यधावत्तां मुष्टि

स० मुद्यम्य वेगवान् ॥ मं०५६२
१३६ ॥१५॥ स मुष्टिं पातयामा
स हृदये दैत्यपुंगवः ॥ दे
व्यास्तं चापि सा देवी तले
नोरस्यताडयत् ॥ मं०५६३
॥१६॥ तलप्रहाराभिहतो
निपपात महीतले ॥ स दैत्य
अ० राजः सहसा पुनरेव तथो
१० त्थितः ॥ मं०५६४ ॥१७॥ उ
त्पत्य च प्रगृह्योच्चैर्देवीं गगन

मास्थितः ॥ तत्रापि सा निराधारा युयुधे तेन चं
डिका ॥ मं० ५६५ ॥ १८ ॥ नियुद्धं खे तदा दैत्य-
श्चंडिका च परस्परम् ॥ चक्रतुः प्रथमं सिद्धमुनि
विस्मयकारकम् ॥ मं० ५६६ ॥ १९ ॥ ततो नियुद्धं
सुचिरं कृत्वा तेनांबिका सह ॥ उत्पात्य भ्रामयामा
स चिक्षेप धरणीतले ॥ मं० ५६७ ॥ २० ॥ स क्षिप्तो
धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ॥ अभ्यधावत
दुष्टात्मा चंडिकानिधनेच्छया ॥ मं० ५६८ ॥ २१
॥ तमायांतं ततो देवी सर्वदैत्यजनेश्वरम् ॥

स० जगत्यां पातयामास भित्वा शूलेन वक्षसि ॥ मं०

१३७



अ०

१०

५६९ ॥ २२ ॥ स गतासुः पपातोर्व्यां देवीशूलाग्रवि
क्षतः ॥ चालयन्सकलां पृथ्वीं साब्धिद्वीपां सपर्वता
म् ॥ मं० ५७० ॥ २३ ॥ ततः प्रसन्नमखिलं हते
तस्मिन्दुरात्मनि ॥ जगत्स्वास्थ्यमतीवाप निर्मलं
चाभवन्नभः ॥ मं० ५७१ ॥ २४ ॥ उत्पातमेघास्सो
ल्का ये प्रागासंस्ते शमं ययुः ॥ सरितो मार्गवाहि
न्यस्तथासंस्तत्र पातिते ॥ मं० ५७२ ॥ २५ ॥ ततो
देवगणास्सर्वे हर्षनिर्भरमानसाः ॥ बभूवुर्निहते त
स्मिन्गन्धर्वा ललितं जगुः ॥ मं० ५७३ ॥ २६ ॥ अ
वादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥ ववुः पु

स० प्यास्तथा वातास्सुप्रभोभूद्दिवाकरः ॥ मं० ५७४ ॥
१३८ २७ ॥ जज्वलुश्चाग्नयश्शांताः शांतादिग्जनितस्वनाः
॥ मं० ५७५ ॥ २७ ॥ ॥ इति श्रीमार्कण्डेयपुरा
णे सावर्णिके मन्वंतरे देवीमाहात्म्ये शुंभवधो नाम
दशमोऽध्यायः ॥ १० ॥ श्लोकाः २७ ॥ एवमादितः
॥ ४७२ ॥

अ० १०

अथदुर्गासप्तशती।

अध्याय: ११.



ध्यानम्॥ बालरविद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम् ॥ स्मेरमु-
खी वरदाङ्कुशपाशाऽभीतिकरीं प्रभजे भुवनेशीम् ॥ १ ॥

॥ श्रीः ॥ ऋषिरुवाच ॥ मं० ५७६ ॥ देव्या हते तत्र

स० महासुरेंद्रे सेंद्राः सुरा वह्निपुरोगमास्त्ताम् ॥ कात्या
१४० यनीं तुष्टुवुरिष्टलाभाद्धिकासिवक्त्राब्जविकासिता
शाः ॥ मं० ४७७ ॥ १ ॥ देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य ॥ प्रसीद विश्वेश्वरि
पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥ मं० ५७८
॥ २ ॥ आधारभूता जगतस्त्वमेका महीस्वरूपेण य
तः स्थितासि ॥ अपां स्वरूपस्थितया त्वयैतदाप्याय
अ० ते कृत्स्नमलंघ्यवीर्ये ॥ मं० ५७९ ॥ ३ ॥ त्वं वैष्णवी
११ शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया ॥ सं
मोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्ति

हेतुः ॥ मं० ५८० ॥ ४ ॥ विद्याः समस्तास्तव देवि भे
दाः स्त्रियः समस्ताः सकला जगत्सु ॥ त्वयैकया पूरि
तमंबयैतत्काते स्तुतिः स्तव्यपरापरोक्तिः ॥ मं० ५८१
॥ ५ ॥ सर्वभूता यदादेवी स्वर्गमुक्तिप्रदायिनी ॥ त्वं
स्तुता स्तुतये का वा भवंति परमोक्तयः ॥ मं० ५८२
॥ ६ ॥ सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ॥
स्वर्गापवर्गदे देवि नारायणि नमोस्तुते ॥ मं० ५८३
॥ ७ ॥ कलाकाष्ठादिरूपेण परिणामप्रदायिनी ॥ वि
श्वस्योपरतौ शक्ते नारायणि नमोस्तुते ॥ मं० ५८४
॥ ८ ॥ सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके ॥ शर-

स० ण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते ॥ मं० ५८५ ॥
१४१ ९ ॥ सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ॥ गुणा
श्रये गुणमये नारायणि नमोस्तु ते ॥ मं० ५८६ ॥ १० ॥
शरणागतदीनार्तपरित्राणपरायणे ॥ सर्वस्यार्तिहरे
देवि नारायणि नमोस्तु ते ॥ मं० ५८७ ॥ ११ ॥ हंसयु
क्तविमानस्थे ब्रह्माणीरूपधारिणि ॥ कौशांभःक्षरिके दे
वि नारायणि नमोस्तु ते ॥ मं० ५८८ ॥ १२ ॥ त्रिशूलचंद्रा
अ० हिधरे महावृषभवाहिनि ॥ माहेश्वरीस्वरूपेण ना
११ रायणि नमोस्तु ते ॥ मं० ५८९ ॥ १३ ॥ मयूरकुक्कु
टवृते महाशक्तिधरेऽनघे ॥ कौमारीरूपसंस्थाने ना

रायणि नमोस्तु ते ॥ मं० ५१० ॥ १४ ॥ शङ्खचक्रग
दाशार्ङ्गगृहीतपरमायुधे ॥ प्रसीद वैष्णवीरूपे नारा
यणि नमोस्तु ते ॥ मं० ५११ ॥ १५ ॥ गृहीतोग्रमहा
चक्रे दंष्ट्रोद्धृतवसुंधरे ॥ वराहरूपिणि शिवे नारा
यणि नमोस्तु ते ॥ मं० ५१२ ॥ १६ ॥ नृसिंहरूपेणो
ग्रेण हंतुं दैत्यान्कृतोद्यमे ॥ त्रैलोक्यत्राणसहिते ना
रायणि नमोस्तु ते ॥ मं० ५१३ ॥ १७ ॥ किरीटिनि
महावज्रे सहस्रनयनोज्ज्वले ॥ वृत्रप्राणहरे चैंद्रि ना
रायणि नमोस्तु ते ॥ मं० ५१४ ॥ १८ ॥ शिवदूतीस्व
रूपेण हतदैत्ये महाबले ॥ घोररूपे महारावे नाराय

स० णि नमोस्तु ते ॥ मं० ५९५ ॥ १९ ॥ दंष्ट्राकरालवदने शि
१४२ रोमालाविभूषणे ॥ चामुंडे मुंडमथने नारायणि नमोस्तु
ते ॥ मं० ५९६ ॥ २०॥ लक्ष्मि लज्जे महाविद्ये श्रद्धे पु
ष्टिस्वधे ध्रुवे ॥ महारात्रि महाविद्ये नारायणि नमोस्तु
ते ॥ मं० ५९७ ॥ २१ ॥ मेधे सरस्वति वरे भूति बाभ्र
वि तामसि ॥ नियते त्वं प्रसीदेशे नारायणि नमोस्तु ते
॥ मं० ५९८ ॥ २२ ॥ सर्वस्वरूपे सर्वेशे सर्वशक्तिसम
अ० न्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते ॥
११ मं० ५९९ ॥ २३ ॥ एतत्ते वदनं सौम्यं लोचनत्रयभूषित
म् ॥ पातु नः सर्वभीतिभ्यः कात्यायनि नमोस्तु ते ॥

मं० ६०० ॥ २४ ॥ ज्वालाकरालमत्युग्रमशेषासुरसूदन
म् ॥ त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते ॥ मं०
६०१ ॥ २५ ॥ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या ज
गत् ॥ सा घंटा पातु नो देवि पापेभ्योऽनः सुतानिव
॥ मं० ६०२ ॥ २६ ॥ असुरासृग्वसापंकचर्चितस्ते करो
ज्ज्वलः ॥ शुभाय खड्गो भवतु चंडिके त्वां नता वयम्
॥ मं० ६०३ ॥ २७ ॥ रोगानशेषानपहंसि तुष्टा रुष्टा
तु कामान्सकलानभीष्टान् ॥ त्वामाश्रितानां न विप
न्नराणां त्वामाश्रिता ह्याश्रयतां प्रयांति ॥ मं० ६०४ ॥
२८ ॥ एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महा

स० सुराणाम् ॥ रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वाऽम्बिके त
१४३ त्प्रकरोति काऽन्या ॥ मं० ६०५ ॥ २९ ॥ विद्यासु शा
स्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ॥
ममत्वगर्तेतिमहान्धकारे विभ्रामयत्येतदतीवविश्वम्
॥ मं० ६०६ ॥ ३० ॥ रक्षांसि यत्रोग्रविषाश्च नागा यत्रा
रयो दस्युबलानि यत्र ॥ दावानलो यत्र तथाब्धिमध्ये
तत्र स्थिता त्वं परिपासि विश्वम् ॥ मं० ६०७ ॥ ३१ ॥
अ० विश्वेश्वरी त्वं परिपासि विश्वं विश्वात्मिका धारयसी
११ ति विश्वम् ॥ विश्वेशवंद्या भवती भवंति विश्वाश्र
या ये त्वयि भक्तिनम्राः ॥ मं० ६०८ ॥ ३२ ॥ देवि प्रसी

द परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः ॥ पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ॥ मं० ६०९ ॥ ३३ ॥ प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ॥ त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥ मं० ६१० ॥ ३४ ॥ ॥ देव्युवाच ॥ मं० ६११ ॥ वरदाहं सुरगणा वरं यं मनसेच्छथ ॥ तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥ मं० ६१२ ॥ ३५ ॥ ॥ देवा ऊचुः ॥ ॥ मं० ६१३ ॥ सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥

१ सर्वाबाधाप्रशमनमित्यपि पाठः । बहुषु पुस्तकेषु दृष्टत्वात् ।

स॰ एवमेव त्वया कार्यमस्मद्वैरि विनाशनम् ॥ मं॰ ६१४ ॥
१५४ ३६ ॥ ॥ देव्युवाच ॥ ॥ मं॰ ६१५ ॥ वैवस्वतेंतरे प्रा
प्ते अष्टाविंशतिमे युगे ॥ शुंभो निशुंभश्चैवान्यावुत्प
त्स्येते महासुरौ ॥ मं॰ ६१६ ॥ ३७ ॥ नंदगोपगृहे जा
ता यशोदागर्भसंभवा ॥ ततस्तौ नाशयिष्यामि विंध्या
चलनिवासिनी ॥ मं॰ ६१७ ॥ ३८ ॥ पुनरप्यतिरौद्रे
ण रूपेण पृथिवीतले ॥ अवतीर्य हनिष्यामि वैप्र-
अ॰ चित्तांश्च दानवान् ॥ मं॰ ६१८ ॥ ३९ ॥ भक्षयंत्याश्च
११ तानुग्रान्वैप्रचित्तान्महासुरान् ॥ रक्तादंता भविष्यंति
दाडिमीकुसुमोपमाः ॥ मं॰ ६१९ ॥ ४० ॥ ततो मां

देवताः स्वर्गे मर्त्यलोके च मानवाः ॥ स्तुवंतो व्या
हरिष्यंति सततं रक्तदंतिकाम् ॥ मं० ६२० ॥ ४१
॥ भूयश्च शतवार्षिक्यामनावृष्ट्यामनंभसि ॥
मुनिभिः संस्मृता भूमौ संभविष्याम्ययोनिजा ॥
मं० ६२१ ॥ ४२ ॥ ततः शतेन नेत्राणां निरी
क्षिष्यामि यन्मुनीन् ॥ कीर्तयिष्यंति मनुजाः श
ताक्षीमिति मां ततः ॥ मं० ६२२ ॥ ४३ ॥ ततो
ऽहमखिलं लोकमात्मदेहसमुद्भवैः ॥ भरिष्यामि
सुराः शाकैरावृष्टेः प्राणधारकैः ॥ मं० ६२३ ॥ ४४ ॥
शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि ॥

स० तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥ मं०६२४

१४५

अ०

११

॥४५॥ दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति॥

स॰ पुनश्चाहं यदा भीमं रूपं
१४६ कृत्वा हिमाचले ॥ मं॰ ६२५
॥ ४६ ॥ रक्षांसि भक्षयि-
ष्यामि मुनीनां त्राणका
रणात् ॥ तदा मां मुनयः
सर्वे स्तोष्यंत्या नम्रमूर्त
यः ॥ मं॰ ६२६ ॥ ४७ ॥
अ॰ भीमा देवीति विख्यातं
११ तन्मे नाम भविष्यति ॥ य
दारुणाख्य स्तैे लोकये -

महाबाधां करिष्यति ॥ मं० ६।२७॥४८॥ तदाहंभामरूपं

कृत्वासंख्येयषट्पदम् ।। त्रैलोक्यस्य हितार्थाय वधि

ष्यामि महासुरम् ॥ मं० ६२८ ॥ ४९ ॥ भ्रामरीतिच
मां लोकास्तदा स्तोष्यंति सर्वतः ॥ इत्थं यदायदा
बाधा दानवोत्था भविष्यति ॥ मं० ६२९ ॥ ५०॥ तदा
तदाऽवतीर्याहं करिष्याम्यरिसंक्षयम् ॥ मं०६३० ॥
५०॥ ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वं
तरे देवीमाहात्म्ये देवकृत नारायणीस्तुतिर्नामैकाद
शोऽध्यायः ॥ ११ ॥ श्लोकाः ५०॥ एवमादितः ॥
५२२ ॥

इति एकादशोऽध्यायः ।

अथ दुर्गासप्तशती ।

अध्याय : १२

॥ध्यानम्॥ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां कन्याभिः
करवालखेटविलसद्धस्ताभिरासेविताम् ॥ हस्तैश्चक्रगदासिखेटविशिखाँ
श्चापं गुणं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥१॥

॥ देव्युवाच ॥ मं० ६३१ ॥ एभिः स्तवैश्च मां नित्यं
स्तोष्यते यः समाहितः ॥ तस्याहं सकलां बाधां नाश
यिष्याम्यसंशयम् ॥ मं० ६३२ ॥ १ ॥ मधुकैटभनाशं
च महिषासुरघातनम् ॥ कीर्तयिष्यंति ये तद्वद्वधं शुं
भनिशुंभयोः ॥ मं० ६३३ ॥ २ ॥ अष्टम्यां च चतुर्द
श्यां नवम्यां चैकचेतसः ॥ श्रोष्यंति चैव ये भक्त्या
मम माहात्म्यमुत्तमम् ॥ मं० ६३४ ॥ ३ ॥ न तेषां दु
ष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥ भविष्यति न दा
रिद्र्यं न चैवेष्टवियोजनम् ॥ मं० ६३५ ॥ ४ ॥ शत्रुतो
न भयं तस्य दस्युतो वा न राजतः ॥ न शस्त्रानलतो

यौघात्कदाचित्संभविष्यति ॥ मं० ६३६ ॥ ५ ॥ तस्मा
न्ममैतन्माहात्म्यं पठितव्यं समाहितैः ॥ श्रोतव्यंच
सदा भक्त्या परं स्वस्त्ययनं हि तत् ॥ मं० ६३७ ॥ ६
॥ उपसर्गानशेषांस्तु महामारीसमुद्भवान् ॥ तथा त्रि
विधमुत्पातं माहात्म्यं शमयेन्मम ॥ मं० ६३८ ॥ ७
॥ यत्रैतत्पठ्यते सम्यङ् नित्यमायतने मम ॥ सदा
न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ॥ मं०
६३९ ॥ ८ ॥ बलिप्रदाने पूजायामग्निकार्ये महोत्सवे
॥ सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥ मं० ६४०
॥ ९ ॥ जानताऽजानता वापि बलिपूजां तथा कु-

ताम् ॥ प्रतीक्षिष्याम्यहं प्रीत्या वह्नि होमं यथाकृतम्
॥ मं० ६४१ ॥ १० ॥ शरत्काले महापूजा क्रियते याच वार्षि
की ॥ तस्यां ममै तन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥
मं० ६४२ ॥ ११ ॥ सर्वबाधा विनिर्मुक्तो धनधान्यसुतान्वि
तः ॥ मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ मं० ६४३
॥ १२ ॥ श्रुत्वा ममै तन्माहात्म्यं तथा चोत्पत्तयः शुभाः
॥ पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥ मं० ६४४ ॥
१३ ॥ रिपवः संक्षयं यांति कल्याणं चोपपद्यते ॥ नंदते च
कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥ मं० ६४५ ॥ १४ ॥
शांति कर्माणि सर्वत्र तथा दुःस्वप्नदर्शने ॥ ग्रहपीडासु चो

स० ग्रासु माहात्म्यं शृणुयान्मम ॥ मं० ६४६ ॥ १५ ॥
१५१ उपसर्गाः शमं यांति ग्रहपीडाश्च दारुणाः ॥ दुःस्व
प्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ मं० ६४७ ॥१६
॥ बालग्रहाभिभूतानां बालानां शांतिकारकम् ॥ सं
घातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥मं० ६४८ ॥
१७ ॥ दुर्वृत्तानामशेषाणां बलहानिकरं परम् ॥ र
क्षोभूतपिशाचानां पठनादेव नाशनम् ॥ मं० ६४९
अ० ॥१८॥ सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम्
१२ ॥ पशुपुष्पार्घ्यधूपैश्च गंधदीपैस्तथोत्तमैः ॥ मं० ६५०
॥ १९ ॥ विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् ॥

अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥ मं० ६५१
॥२०॥ प्रीतिर्मे क्रियते साऽस्मिन्सकृदुच्चरिते श्रुते॥
श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥ मं० ६५२
॥ २१ ॥ रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम॥
युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥ मं० ६५३ ॥
२२॥ तस्मिन्कृते वैरिकृतं भयं पुंसां न जायते॥ यु
ष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः॥ मं०
६५४ ॥ २३ ॥ ब्रह्मणा च कृतास्तास्तु प्रयच्छंति शु
भां मतिम् ॥ अरण्ये प्रांतरे वापि दावाग्निपरिवारि
तः ॥ मं० ६५५ ॥ २४ ॥ दस्युभिर्वा वृतः शून्ये गृही

स० तो वापि शत्रुभिः ॥ सिंहव्याघ्रानुयातो वा वने वावन
१५२ हस्तिभिः ॥ मं० ६५६ ॥ २५ ॥ राज्ञा क्रुद्धेन चाज्ञप्तोव
ध्यो बंधगतोपि वा ॥ आघूर्णितो वा वातेन स्थितःपो
ते महार्णवे ॥ मं० ६५७ ॥ २६ ॥ पतत्सु चापि शस्त्रेषु
संग्रामे भृशदारुणे ॥ सर्वबाधासु घोरासु वेदनाभ्यर्दि
तोपि वा ॥ मं० ६५८ ॥ २७ ॥ स्मरन्ममैतच्चरितं नरो
मुच्येत संकटात् ॥ मम प्रभावात्सिंहाद्या दस्यवो वै
अ० रिणस्तथा ॥ मं० ६५९ ॥ २८ ॥ दूरादेव पलायंते स्मर
१२ तश्चरितं मम ॥ मं० ६६० ॥ ॥ ऋषिरुवाच ॥ ॥
मं० ६६१ ॥ इत्युक्त्वा सा भगवती चंडिका चंडविक्र

मा ॥ मं० ६६२ ॥ २९ ॥ पश्यतामेव देवानां तत्रैवांतर
धीयत ॥ तेपि देवा निरातंकाः स्वाधिकारान्यथापुरा
॥ मं० ६६३ ॥ ३० ॥ यज्ञभागभुजः सर्वे चक्रुर्विनिह
तारयः ॥ दैत्याश्च देव्या निहते शुंभे देवरिपौ युधि ॥
मं० ६६४ ॥ ३१ ॥ जगद्विध्वंसके तस्मिन्महोग्रेऽतु
लविक्रमे ॥ निशुंभे च महावीर्ये शेषाः पातालमाय
युः ॥ मं० ६६५ ॥ ३२ ॥ एवं भगवती देवी सा नित्या
पि पुनःपुनः ॥ संभूय कुरुते भूप जगतः परिपाल
नम् ॥ मं० ६६६ ॥ ३३ ॥ तयैतन्मोह्यते विश्वं सैव
विश्वं प्रसूयते ॥ सा याचिता च विज्ञानं तुष्टा ऋ

स० द्धिं प्रयच्छति ॥ मं० ६६७ ॥ ३४ ॥ व्याप्तं तयैतत्सक-
१५३ लं ब्रह्मांडं मनुजेश्वर ॥ महाकाल्या महाकाले मह
मारीस्वरूपया ॥ मं० ६६८ ॥ ३५ ॥ सैव काले मह
मारी सैव सृष्टिर्भवत्यजा ॥ स्थितिं करोति भूतानांसै
व काले सनातनी ॥ मं० ६६९ ॥ ३६ ॥ भवकाले नृ
णां सैव लक्ष्मीर्वृद्धिप्रदागृहे ॥ सैवाभावे तथा लक्ष्मी
र्विनाशायोपजायते ॥ मं० ६७० ॥ ३७ ॥ स्तुता संपू
अ० जिता पुष्पैर्धूपगंधादिभिस्तथा ॥ ददाति वित्तं पुत्रां
१२ श्च मतिं धर्मे गतिं शुभाम् ॥ मं० ६७१ ॥ ३८ ॥ ॥
इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देव्याश्च

रितमाहात्म्यं नाम द्वादशोऽध्यायः ॥ १२॥ ॥

॥ श्लोकाः ॥ ३८ ॥ ॥ एवमादितः ५६० ॥ ॥



इति द्वादशोऽध्यायः

अथदुर्गासप्तशती।

अध्याय: १३

ध्यानम् ॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ॥ पाशाङ्कुशव
राऽभीतीर्धारयन्तीं शिवां भजे ॥ १ ॥

॥ श्रीः ॥ ॥ ऋषिरुवाच ॥ ॥ मं० ६७२ ॥ एतत्ते
कथितं भूप देवीमाहात्म्यमुत्तमम् ॥ एवंप्रभावा सा
देवी ययेदं धार्यते जगत् ॥ मं० ६७३ ॥ १ ॥ विद्यात
थैव क्रियते भगवद्विष्णुमायया ॥ तया त्वमेष वैश्य
श्च तथैवान्ये विवेकिनः ॥ मं० ६७४ ॥ २ ॥ मोह्यंते
मोहिताश्चैव मोहमेष्यंति चापरे ॥ तामुपैहि महारा
ज शरणं परमेश्वरीम् ॥ मं० ६७५ ॥ ३ ॥ आराधिता
सैव नृणां भोगस्वर्गापवर्गदा ॥ मं० ६७६ ॥ ॥
॥ मार्कण्डेयउवाच ॥ ॥ मं० ६७७ ॥ इतित
स्य वचः श्रुत्वा सुरथः स नराधिपः ॥ मं० ६७८ ॥ ४ ॥

स० प्रणिपत्य महाभागं तमृषिं शंसितव्रतम् ॥ निर्विण्णो

१५६



अ०

१२

तिममत्वेन राज्यापहरणेन च ॥ मं० ६७९ ॥ ५ ॥ जगा
म सद्यस्तपसे स च वैश्यो महामुने ॥ संदर्शनार्थम
म्बाया नदीपुलिनमास्थितः ॥ मं० ६८० ॥ ६ ॥ सच
वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥ तौ तास्मिन्पु
लिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥ मं० ६८१ ॥ ७
॥ अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥ निरा
हारौ यताहारौ तन्मनस्कौ समाहितौ ॥ मं० ६८२ ॥ ८
॥ ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ॥ एवं
समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ मं० ६८३ ॥ ९ ॥
परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडिका ॥ मं० ६८४

स० ॥ देव्युवाच ॥ मं० ६८५ ॥ यत्प्रार्थ्यते त्वया भूप त्वया
१५७ च कुलनंदन ॥ मं० ६८६ ॥ १० ॥ मत्तस्तत्प्राप्यतां स
र्वं परितुष्टा ददामि तत् ॥ मं० ६८७ ॥ मार्कंडेयउवाच
॥ मं० ६८८ ॥ ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्म
नि ॥ मं० ६८९ ॥ ११ ॥ अत्रैव च निजं राज्यं हतशत्रु
बलं बलात् ॥ सोपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमा
नसः ॥ मं० ६९० ॥ १२ ॥ ममेत्यहमिति प्राज्ञः संगवि-
अ० च्युतिकारकम् ॥ मं० ६९१ ॥ देव्युवाच ॥ मं० ६९२ ॥
१३ स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥ मं० ६९३
॥ १३ ॥ हत्वा रिपूनस्खलितं तव तत्र भविष्यति ॥



मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः ॥ मं०६१४॥
१४॥ सावर्णिको मनुर्नाम भवान्भुवि भविष्यति ॥

स० वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवांछितः ॥ मं० ६९५
१५८ ॥ १५ ॥ तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति
॥ मं० ६९६ ॥ मार्कंडेय उवाच ॥ मं० ६९७ ॥ इति द
त्त्वा तयोर्देवी यथाभिलषितं वरम् ॥ मं० ६९८ ॥ १६
॥ बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥ ए
वं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥ मं० ६९९ ॥
१७ ॥ सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ मं०
अ- ७०० ॥ १७ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वं
१३ तरे देवीमाहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम त्रयोद
शोऽध्यायः ॥ १३ ॥ उवा० ॥ ६ ॥ श्लोकाः १७ ॥ एव० ॥ ५७८

श्रीः ॥ अथोत्तरन्यासाः ॥ खड्गिनी शूलिनीघोरा० हृदयाय नमः ॥ शूलेन पाहिनो देवि० शिरसे स्वाहा ॥ प्राच्यांरक्षप्रतीच्यांच० शिखायै वषट् ॥ सौम्यानि यानि रूपाणि० कवचाय हुम् ॥ खड्गशूल गदादीनि० नेत्रत्रयाय वौषट् ॥ सर्वस्वरूपे सर्वेशे० अस्त्रायफट् ॥ अथ ध्यानम् ॥ विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितांभीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥ हस्तैश्चक्रधरालिखेटविशिखांश्चापंगुणं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥ १ ॥ अथ देवीसूक्तम् ॥ नमो देव्यै महा

दे. देव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भद्रायै नियताः
१५९ प्रणतास्स्म ताम् ॥ १ ॥ रौद्रायै नमो नित्यायै गौर्यै धा-
त्र्यै नमोनमः ॥ ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं
नमः ॥ २ ॥ कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्म्मो न-
मोनमः ॥ नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमोन
मः ॥ ३ ॥ दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥ ख्या
त्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ ४ ॥ अतिसौ
म्यातिरौद्रायै नतास्तस्यै नमोनमः ॥ नमो जगत्प्रति
सू. ष्ठायै देव्यै कृत्यै नमोनमः ॥ ५ ॥ या देवी सर्वभूतेषु
विष्णुमायेति शब्दिता ॥ नमस्तस्यै नमस्तस्यै नम

स्तस्यै नमोनमः ॥ ६ ॥ या देवी सर्वभूतेषु चेतनेत्यभि
धीयते॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः ॥ ७॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥ नमस्तस्यै
नमस्तस्यै नमस्तस्यै नमोनमः ॥ ८ ॥ या देवी सर्वभू
तेषु निद्रारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नम
स्तस्यै नमोनमः ॥ ९ ॥ या देवी सर्वभूतेषु क्षुधारूपे
ण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोन
मः ॥ १० ॥ या देवी सर्वभूतेषुच्छायारूपेण संस्थिता
॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः ॥ ११ ॥
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥ नमस्त-

स्यै नमस्तस्यै नमस्तस्यै नमोनमः ॥ १२ ॥ या देवी स
र्वभूतेषु तृष्णारूपेण संस्थिता ॥ नमस्तस्यै नमस्त
स्यै नमस्तस्यै नमोनमः ॥ १३ ॥ या देवी सर्वभूतेषु
शांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नम
स्तस्यै नमोनमः ॥ १४ ॥ या देवी सर्वभूतेषु जाति
रूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै न
मोनमः ॥ १५ ॥ या देवी सर्वभूतेषु लज्जारूपेणसंस्थि
ता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः ॥ १६
॥ या देवी सर्वभूतेषु शांतिरूपेण संस्थिता ॥ नमस्त
स्यै नमस्तस्यै नमोनमः ॥ १७ ॥ या देवी

सर्वभूतेषु श्रद्धारूपेण संस्थिता ॥ नमस्तस्यै नमस्त
स्यै नमस्तस्यै नमोनमः ॥ १८ ॥ या देवी सर्वभूतेषु
कांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्त
स्यै नमोनमः ॥ १९ ॥ या देवी सर्वभूतेषु लक्ष्मीरूपे
ण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोन
मः ॥ २० ॥ या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः ॥ २१ ॥ या
देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ॥ नमस्तस्यै न
मस्तस्यै नमस्तस्यै नमोनमः ॥ २२ ॥ या देवी सर्वभू
तेषु दयारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नम

दे॰ स्त्तस्यै नमोनमः ॥ २३ ॥ या देवी सर्वभूतेषु तुष्टिरूपे
१६१ ण संस्थिता ॥ नमस्त्तस्यै नमस्त्तस्यै नमस्त्तस्यै नमो न
मः ॥ २४ ॥ या देवी सर्वभूतेषु मातृरूपेण संस्थिता ॥
नमस्त्तस्यै नमस्त्तस्यै नमस्त्तस्यै नमोनमः ॥ २५ ॥ या
देवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता ॥ नमस्त्तस्यै न
मस्त्तस्यै नमस्त्तस्यै नमोनमः ॥ २६ ॥ इंद्रियाणामधि
ष्ठात्री भूतानां चाखिलेषुया ॥ भूतेषु सततं तस्यै व्या
प्त्यै देव्यै नमोनमः ॥ २७ ॥ चितिरूपेण या कृत्स्नमे
सू॰ तद्व्याप्य स्थिता जगत् ॥ नमस्त्तस्यै नमस्त्तस्यै नमस्त
स्यै नमोनमः ॥ २८ ॥ स्तुतासुरैः पूर्वमभीष्टसंश्रयात्त

थासुरेंद्रेण दिनेषु सेविता ॥ करोतु सा नः शुभहेतुरीश्व
रीशुभानि भद्राण्यभिहंतु चापदः ॥२९॥ या सांप्रतं
चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते ॥ या
च स्मृता तत्क्षणमेव हंति नः सर्वापदो भक्तिविनम्रमू-
र्तिभिः ॥३०॥ इति देवीसूक्तं पठित्वाऽष्टोत्तरशतं न
वार्णजपं कृत्वा तदुत्तरन्यासान्विधाय ॥ गुह्यातिगु
ह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु
मे देवि त्वत्प्रसादान्महेश्वरि ॥३१॥ इति देव्या वाम
हस्ते जपं निवेदयेत् ॥

इति देवीसूक्तम्।

अथ प्राधानिकं रहस्यम् ।



॥ श्रीः ॥ श्रीगणप
तिर्जयति ॥ अस्य
श्रीसप्तशतीरहस्यत्रयस्य
॥ नारायण ऋषिः॥
अनुष्टुप् छन्दः ॥
महाकाली महा ल
क्ष्मी महासरस्वत्यो
देवताः ॥ यथोक्त
फलावाप्त्यर्थं जपेवि-
नियोगः॥राजोवाच॥

प्रा॰ भगवन्नवतारा मे चंडिकायास्त्वयोदिताः ॥ एतेषां प्रकृ
१६४ तिं ब्रह्मन्प्रधानं वक्तुमर्हसि ॥ १ ॥ आराध्यं यन्मया दे
व्याः स्वरूपं येन तद्द्विज ॥ विधिना ब्रूहि सकलं यथाव
त्प्रणतस्य मे ॥ २ ॥ ॥ ऋषिरुवाच ॥ ॥ इदं रहस्यं
परममनाख्येयं प्रचक्षते ॥ भक्तोसीति न मे किंचित्त
वावाच्यं नराधिप ॥ ३ ॥ सर्वस्याद्या महालक्ष्मीस्त्रि
गुणा परमेश्वरी ॥ लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृ
त्स्नं व्यवस्थिता ॥ ४ ॥ मातुलिंगं गदां खेटं पानपा
र॰ त्रं च बिभ्रती ॥ नागं लिंगं च योनिं च बिभ्रती नृप
मूर्धनि ॥ ५ ॥ तप्तकांचनवर्णाभा तप्तकांचनभूषणा

॥ शून्यं तदखिलं स्वेन पूरयामास तेजसा ॥ ६ ॥ शू
न्यं तदखिलं लोकं विलोक्य परमेश्वरी ॥ बभाररूप
मपरं तमसा केवलेन हि ॥ ७ ॥ सा भिन्नाञ्जनसङ्का
शा दंष्ट्रांचितवरानना ॥ विशाललोचना नारी बभूव
तनुमध्यमा ॥ ८ ॥ खड्गपाशशिरःखेटैरलंकृतचतु
र्भुजा ॥ कबंधहारं शिरसा बिभ्राणा हि शिरःस्रज-
म् ॥ ९ ॥ सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा
॥ नाम कर्म च मे मातर्देहि तुभ्यं नमोनमः ॥ १० ॥
तां प्रोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम् ॥ ददा
मि तव नामानि यानि कर्माणि तानि च ॥ ११ ॥ महा

माया महाकाली महामारी क्षुधा तृषा ॥ निद्रा तृष्णा
चैकवीरा कालरात्रिर्दुरत्यया ॥ १२ ॥ इमानि तव नामा
नि प्रतिपाद्यानि कर्मभिः ॥ एभिः कर्माणि ते ज्ञात्वा
योऽधीते सोऽश्नुते सुखम् ॥१३॥ तामित्युक्त्वा महा
लक्ष्मीः स्वरूपमपरं नृप ॥ सत्त्वाख्येनातिशुद्धेन गुणे
नेंदुप्रभं दधौ ॥ १४ ॥ अक्षमालांकुशधरा वीणापुस्त
कधारिणी ॥ सा बभूव वरा नारी नामान्यस्यै च सा
२० ददौ ॥१५॥ महाविद्या महावाणी भारती वाक्सरस्व
ती ॥ आर्या ब्राह्मी कामधेनुर्वेदगर्भा च धीश्वरी ॥
१६॥ अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम् ॥

युवां जनयतां देव्यौ मिथुने स्वानुरूपतः ॥ १७ ॥ इत्यु
क्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम् ॥ हिर
ण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥ १८ ॥ ब्रह्म
न्विधे विरंचेति धातरित्याह तं नरम् ॥ श्रीः पद्मे क
मले लक्ष्मीत्याह माता स्त्रियं च ताम् ॥ १९ ॥ महा
काली भारतीच मिथुने सृजतः सह ॥ एतयोरपिरू
पाणि नामानि च वदामि ते ॥ २० ॥ नीलकंठं र
क्तबाहुं श्वेतांगं चंद्रशेखरम् ॥ जनयामास पुरुषं
महाकाली सितां स्त्रियम् ॥ २१ ॥ स रुद्रः

प्रा॰ शंकरः स्थाणुः कपर्दी च त्रिलोचनः ॥ त्रयी विद्या

१६६

९०

कामधेनुः सा स्त्रीभाषाऽक्षरा स्वरा ॥ २२॥ सरस्व
ती स्त्रियं गौरीं कृष्णं च पुरुषं नृप ॥ जनयामास
नामानि तयोरपि वदामि ते ॥ २३ ॥ विष्णुःकृष्णो
हृषीकेशो वासुदेवो जनार्दनः ॥ उमा गौरी सतीचं
डी सुंदरी सुभगा शुभा ॥ २४ ॥ एवं युवतयः स
द्यः पुरुषत्व प्रपेदिरे ॥ चक्षुष्मंतो नुपश्यंति नेत
रेऽ तद्विदो जनाः ॥२५॥ ब्रह्मणे प्रददौ पत्नीं महा
लक्ष्मीर्नृप त्रयीम् ॥ रुद्राय गौरीं वरदां वासुदेवाय
च श्रियम् ॥२६॥ स्वरया सह संभूय विरिंचोंडमजी
जनत् ॥ बिभेद भगवान्रुद्रस्त्त गौर्या सह वीर्यवान्॥



२७॥ अंडमध्ये प्रधानादि कार्यजातमभून्नृप ॥ महा
भूतात्मकं सर्वं जगत्स्थावरजंगमम् ॥२८॥ पुपोष

पालयामास तल्लक्ष्म्या सह केशवः ॥ संजहार जग
त्सर्वं सह गौर्या महेश्वरः ॥ २९ ॥ महालक्ष्मीर्महारा
ज सर्वसत्त्वमयीश्वरी ॥ निराकारा च साकारा सैव
नानाभिधानभृत् ॥ ३० ॥ नामांतरैर्निरूप्यैषा नाम्ना
नान्येन केनचित् ॥ ३१ ॥ ॥ इति प्राधानिकं रह
स्यं समाप्तम् ॥

इति प्राधानिकं रहस्यम्।

अथ वैकृतिकरहस्यम् ।



॥श्रीः॥ऋषिरुवाच॥
त्रिगुणा तामसी देवी
सात्त्विकी या त्वयोदि
ता ॥ सा शर्वा चंडिका
दुर्गा भद्रा भगवतीर्यते
॥ १ ॥ योगनिद्रा हरे
रुक्ता महाकाली तमो
गुणा ॥ मधुकैटभना
शार्थं यां तुष्टावांबुजा
सनः ॥२॥ दशवक्त्रा

वै० दशभुजा दशपादाजनप्रभा ॥ विशालया राजमाना
१८० त्रिंशल्लोचनमालया ॥ ३ ॥ स्फुरद्दशनदंष्ट्रा सा भीमरू
पापि भूमिप ॥ रूपसौभाग्यकांतीनां सा प्रतिष्ठा महा
श्रियाम् ॥ ४ ॥ खड्गबाणगदाशूलशंखचक्रभुशुंडिभृ-
त् ॥ परिघं कार्मुकं शीर्षं निश्चोतद्रुधिरं दधौ ॥ ५ ॥ए
षा सा वैष्णवी माया महाकाली दुरत्यया ॥ आराधिता
वशीकुर्यात्पूजाकर्तुश्चराचरम् ॥ ६ ॥ सर्वदेवशरीरे
भ्यो याविर्भूतामितप्रभा ॥ त्रिगुणा सा महालक्ष्मीः
२० साक्षान्महिषमर्दिनी ॥ ७ ॥ श्वेतानना नीलभुजासु
श्वेतस्तनमंडला ॥ रक्तमध्या रक्तपादा नीलजंघोरुरु

न्मदा ॥ ८॥ सुचित्रजघना चित्रमाल्यांबरविभूषणा
॥ चित्रानुलेपना कांतिरूपसौभाग्यशालिनी ॥ ९ ॥अ
ष्टादशभुजा पूज्या सा सहस्रभुजा सती ॥ आयुधान्य
त्र वक्ष्यंते दक्षिणाधः करक्रमात् ॥ १० ॥ अक्षमाला
च कमलं बाणोसिः कुलिशं गदा ॥ चक्रं त्रिशूलं परशुः
शंखो घंटा च पाशकः ॥ ११ ॥ शक्तिर्दंडश्चर्म चापं पा
नपात्रं कमंडलुः ॥ अलंकृतभुजामेभिरायुधैः कमला
सनाम् ॥ १२ ॥ सर्वदेवमयीमीशां महालक्ष्मीमिमांनृ
प ॥ पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत् ॥ १३ ॥
गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया ॥ साक्षात्सर

वै॰ स्वती प्रोक्ता शुंभासुरनिबर्हिणी ॥ १४ ॥ दधौ चाष्टभुजा
१७१ बाणान्मुसलं शूलचक्रभृत् ॥ शंखं घंटां लांगलं च का
र्मुकं वसुधाधिप ॥ १५ ॥ एषा संपूजिता भक्त्या सर्वज्ञ
त्वं प्रयच्छति ॥ निशुंभमथिनी देवी शुंभासुरनिबर्हि
णी ॥ १६ ॥ इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थि
व ॥ उपासनं जगन्मातुः पृथगासां निशामय ॥ १७॥
महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती ॥ दक्षिणो
त्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् ॥ १८ ॥ विरंचिः स्व
र॰ रया मध्ये रुद्रो गौर्या च दक्षिणे ॥ वामे लक्ष्म्या हृषी
केशः पुरतो देवतात्रयम् ॥ १९ ॥ अष्टादशभुजामध्ये

वामे चास्या दशानना ॥ दक्षिणेष्टभुजालक्ष्मीर्महतीति



समर्चयेत् ॥ २० ॥ पूर्वादिदलतः पूज्या असितांगादिभै
रवाः ॥ अष्टादशभुजाचैषा यदा पूज्या नराधिप ॥ २१
॥ दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा ॥ दशान
ना यदा पूज्या दक्षिणोत्तरयोस्तदा ॥ २२ ॥ कालमृत्यू
च संपूज्यौ सर्वारिष्टप्रशांतये ॥ यदा चाष्टभुजा पूज्या
शुंभासुरनिबर्हिणी ॥ २३ ॥ नवास्याः शक्तयः पूज्या
स्तदा रुद्रविनायकौ ॥ नमो देव्या इति स्तोत्रैर्महालक्ष्मी
समर्चयेत् ॥ २४ ॥ अवतारत्रयार्चायां स्तोत्रमंत्रास्तदा

श्रयाः ॥ अष्टादशभुजा चैषा पूज्या महिषमर्दिनी ॥ २५
॥ महालक्ष्मी र्महाकाली सैव प्रोक्ता सरस्वती ॥ ईश्वरी

पुण्यपापानां सर्वलोकमहेश्वरी ॥ २६ ॥ महिषांतकरी
येन पूजिता स जगत्प्रभुः ॥ ×पूजयेज्जगतां धात्रीं चण्डिकां
भक्तवत्सलाम् ॥ २७ ॥ अर्घ्यादिभिरलंकारैर्गंधपुष्पैस्त
थोत्तमैः ॥ धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥२८
॥ रुधिराक्तेन बलिना मांसेन सुरया नृप ॥ बलिमांसा
दि पूजेयं विप्रवर्ज्या मयेरिता ॥ २९ ॥ तेषां किल सु-
रामांसैर्नोक्ता पूजा नृप क्वचित् ॥ प्रणामाचमनीयैश्च
चंदनेन सुगंधिना ॥ ३० ॥ सकर्पूरैश्च तांबूलैर्भक्तिभाव

× लिखित्वाष्टदलं पद्मं चन्दनागरुकुंकुमैः । षट्कोणञ्च त्रिकोणञ्च देवीं तन्मध्यतोऽर्चयेत् ॥ एतदधिकं क्वचिदुपलभ्यते ।

समन्वितैः ॥ वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम् ॥
३१ ॥ पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया ॥ दक्षि
णे पुरतः सिंहं समग्रं धर्ममीश्वरम् ॥ ३२ ॥ वाहनं पूज
येद्देव्या धृतं येन चराचरम् ॥ ततः कृतांजलिर्भूत्वा स्तु
वीत चरितैरिमैः ॥ ३३ ॥ एकेन वा मध्यमेन नैकेनेतरयो
रिह ॥ चरितार्धं तु न जपेज्जपं श्छिद्रमवाप्नुयात् ॥ ३४
॥ स्तोत्रमंत्रैः स्तुवीतेमां यदि वा जगदंबिकाम् ॥ प्रदक्षिणा
नमस्कारान्कृत्वा मूर्ध्नि कृतांजलिः ॥ ३५ ॥ क्षमापयेज्ज
गद्धात्रीं मुहुर्मुहुरतंद्रितः ॥ प्रतिश्लोकं च जुहुयात्पायसं
तिलसर्पिषा ॥ ३६ ॥ जुहुयात्स्तोत्रमंत्रैर्वा चंडिकायै शुभं

हविः ॥ भूयो नामपदैर्देवीं पूजयेत्सुसमाहितः ॥ ३७ ॥
प्रयतः प्रांजलिः प्रह्वः प्राणानारोप्य चात्मनि ॥ सुचिरं
भावयेद्देवीं चंडिकां तन्मयो भवेत् ॥ ३८ ॥ एवं यः पूज
येद्भक्त्या प्रत्यहं परमेश्वरीम् ॥ भुक्त्वा भोगान्यथाका
मं देवीसायुज्यमाप्नुयात् ॥ ३९ ॥ यो न पूजयते नित्यं चं
डिकां भक्तवत्सलाम् ॥ भस्मीकृत्यास्य पुण्यानि निर्दहे
त्परमेश्वरी ॥ ४० ॥ तस्मात्पूजय भूपाल सर्वलोकमहे
श्वरीम् ॥ यथोक्तेन विधानेन चंडिकां सुखमाप्स्यसि
॥ ४१ ॥ इति वैकृतिकरहस्यं समाप्तम् ॥ ॥

॥ इतिवैकृतिकरहस्यं समाप्तम् ॥

अथ मूर्तिरहस्यम्।



॥श्रीः॥ ऋषिरुवाच॥ नंदा भगवती नाम या भविष्यति



मू० नंदजा ॥ स्तुता संपूजिता भक्त्या वशी कुर्याज्जगत्त्रयम्
१७६ ॥ १ ॥ कनकोत्तमकांतिः सा सुकांतिः कनकांबरा ॥ दे
वी कनकवर्णाभा कनकोत्तमभूषणा ॥ २ ॥ कमलांकु
शपाशाब्जैरलंकृतचतुर्भुजा ॥ इंदिरा कमला लक्ष्मीः
सा श्रीरुक्मांबुजासना ॥ ३ ॥ या रक्तदंतिका नाम दे
वी प्रोक्ता मयानघ ॥ तस्याः स्वरूपं वक्ष्यामि शृणु स
र्वभयापहम् ॥ ४ ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र
संशयः ॥ रक्तांबरा रक्तवर्णा रक्तसर्वांगभूषणा ॥ ५ ॥
र० रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा ॥ रक्ततीक्ष्ण
नखा रक्तदशना रक्तदंतिका ॥ ६ ॥ [2]पतिं नारीवानुर

१ रसनेति वा पाठः । २ यथा माता प्रियं पुत्रं देवी भक्तं भजेज्जनम् । पा० ।

क्तादेवी भक्तं भजेज्जनम् ॥ वसुधेव विशाला सा सुमेरु
युगलस्तनी ॥७॥ दीर्घौ लंबावतिस्थूलौ तावतीव मनो
हरौ ॥ कर्कशावतिकांतौ तौ सर्वानंदपयोनिधी ॥ ८ ॥
भक्तान्संपाययेद्देवी सर्वकामदुघौ स्तनौ ॥ खड्गपात्रशि
रःखेटैरलंकृतचतुर्भुजा ॥ ९ ॥ आख्याता रक्तचामुंडादे
वी योगेश्वरीति च ॥ अनया व्याप्तमखिलं जगत्स्थाव
रजंगमम् ॥ १० ॥ इमां यः पूजयेद्भक्त्या स व्याप्नोति च
राचरम् ॥ भुक्त्वा भोगान्यथाकामं देवीसायुज्यमाप्नुया
त् ॥ ११ ॥ अधीते य इमं नित्यं रक्तदंत्या वपुःस्तवम् ॥
तं सा परिचरेद्देवी पतिं[1] प्रियमिवांगना ॥ १२ ॥ शाकंभरी

१ मातापुत्रमिवौरसम् ॥

मू॰ नीलवर्णा नीलोत्पलविलोचना ॥ गंभीरनाभिस्त्रिवलीवि
१७७ भूषिततनूदरी ॥ १३ ॥ सुकर्कशसमोत्तुंगवृत्तपीनघनस्त
नी ॥ मुष्टौ शिलीमुखापूर्णं कमलं कमलालया ॥ १४ ॥
पुष्पपल्लवमूलादिफलाढ्यं शाकसंचयम् ॥ काम्यानंतर
सैर्युक्तं क्षुत्तृण्मृत्युजरापहम् ॥ १५ ॥ कार्मुकं च स्फुर-
त्कांति बिभर्ति परमेश्वरी ॥ शाकंभरी शताक्षी सा सैव
दुर्गा प्रकीर्तिता ॥ १६ ॥ उमा गौरी सती चंडी कालिका सा
र॰ च पार्वती ॥ शाकंभरीं स्तुवन्ध्यायञ्जपन्संपूजयन्नमन्
॥ १७ ॥ अक्षय्यमश्नुते शीघ्रमन्नपानामृतं जलम् ॥ भी
माऽपि नीलवर्णा सा दंष्ट्रा दशनभासुरा ॥ १८ ॥ विशा

ललोचना नारी वृत्तपीनपयोधरा ॥ चंद्रहासं च डमरुं शि
रः पात्रं च बिभ्रती ॥ १९ ॥ एकवीरा कालरात्रिः सैवोक्ता
कामदा स्तुता ॥ तेजोमंडलदुर्धर्षा भ्रामरी चित्रकांतिभृ
त् ॥ २० ॥ चित्रभ्रमरसंकाशा महामारीति गीयते ॥ इ
त्येता मूर्त्तयो देव्या व्याख्याता वसुधाधिप ॥ २१ ॥ जग
न्मातुश्चंडिकायाः कीर्तिताः कामधेनवः ॥ इदं रहस्यं परमं
न वाच्यं कस्यचित्त्वया ॥ २२ ॥ व्याख्यानं दिव्यमूर्तीनामधी
ष्वावहितः स्वयम् ॥ एतस्यास्त्वं प्रसादेन सर्वमान्यो भवि
ष्यसि ॥ २३ ॥ सर्वरूपमयी देवी सर्वं देवीमयं जगत् ॥
अतोहं विश्वरूपां तां नमामि परमेश्वरीम् ॥ २४ ॥ ॥



इति मूर्तिरहस्यं समाप्तम्।। श्रीजगदंबार्पणमस्तु ।।

पुस्तकें मिलने के स्थान

१) खेमराज श्रीकृष्णदास,
श्रीवेंकटेश्वर स्टीम प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
खेतवाडी, मुंबई - ४०० ००४.

२) खेमराज श्रीकृष्णदास,
६६, हडपसर इण्डस्ट्रिअल इस्टेट
पुणे - ४११ ०१३.

३) गंगाविष्णु श्रीकृष्णदास
लक्ष्मीवेंकटेश्वर स्टीम प्रेस,
व बुक डिपो,
अहिल्याबाई चौक, कल्याण
(जि. ठाणे - महाराष्ट्र)

४) खेमराज श्रीकृष्णदास,
चौक - वाराणसी (उ.प्र.)

इति सचित्र दुर्गासप्तशती स०

मुद्रक एवं प्रकाशकः

खेमराज श्रीकृष्णदास,

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,

खेमराज श्रीकृष्णदास मार्ग, मुंबई - ४०० ००४.

पुस्तकें मिलने के स्थान

१) खेमराज श्रीकृष्णदास,
श्रीवेंकटेश्वर स्टीम प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
खेतवाडी, मुंबई - ४०० ००४.

२) खेमराज श्रीकृष्णदास,
६६, हडपसर इण्डस्ट्रिअल इस्टेट
पुणे - ४११ ०१३.

३) गंगाविष्णु श्रीकृष्णदास
लक्ष्मीवेंकटेश्वर स्टीम प्रेस,
व बुक डिपो,
अहिल्याबाई चौक, कल्याण
(जि. ठाणे - महाराष्ट्र)

४) खेमराज श्रीकृष्णदास,
चौक - वाराणसी (उ.प्र.)

KHEMRAJ SHRIKRISHNADASS